सप्तशत्यां होमविधानम् २३३
अन्तःपूजाश्रेष्ठत्वकथनम् २३४
भावयोगीनिरूपणम् २३७
शाबरसाधनकालकथनम् २३७
भाषासाधनकालकथनम् २३७
१. नपुंसाष्टककथनम् २३८
२. बन्ध्याष्टककथनम् २३८
३. अपस्माराष्टककथनम् २३९

(श्लोक संख्या १०६)

श्लोकार्धानुक्रमणिका २४१

परिशिष्ट-१

शब्दपूर्तिः २८५

परिशिष्ट-२
पारिभाषिककोशः २८७
परिशिष्ट-३
देवी देवताओं के प्राकट्य का दिन २९१
परिशिष्ट-४
छिन्नमस्ता खण्ड के अनुसार शैव-वैष्णवादि तन्त्रों की संख्या २९३
परिशिष्ट-५
सम्मोहन तन्त्र के अनुसार तन्त्रों की संख्या २९५
परिशिष्ट-६
सम्मोहन तन्त्र में देशभेद के अनुसार तन्त्रों की संख्या २९६
परिशिष्ट-७
छिन्नमस्ता खण्ड के अनुसार देशपर्याय भेद से तन्त्रों की संख्या २९६
परिशिष्ट-८
शक्तिसङ्गमे समागतानि ग्रन्थ नामानि २९७
परिशिष्ट-९
शक्तिसङ्गमे समागतानि तान्त्रिक मतमतान्तराणि २९९
परिशिष्ट-१०
शक्तिसङ्गमे संदृष्टा विशिष्टाः शब्दा विषयाश्च ३०४

◆

॥ श्रीः ॥

श्रीशक्तिसङ्गमतन्त्रम्

छिन्नमस्ताखण्डः

(शक्तिसङ्गमतन्त्रस्य चतुर्थखण्डात्मकः)

प्रथमः पटलः

विषयनिर्देशकथनम्

श्रीदेव्युवाच–

देवदेव महादेव सर्वसिद्धिप्रवर्तक।
त्वत्तः श्रुतं मया सर्वं रहस्यातिरहस्यकम्॥ १ ॥
इदानीं वद देवेश रहस्यमपरं विभो।

*** सुधा ***

नमामि शारदां देवीं विमलां बुद्धिदायिनीम्।
गणेशं विघ्नहर्त्तारं सर्वविघ्नोपशान्तये॥ १ ॥
आगमस्य प्रणेतारं नित्यानन्दं जगत्प्रभुम्।
वागर्थाविव सम्पृक्तं नमामि गिरिजाशिवम्॥ २ ॥
नमोऽस्तु शिवशक्तीभ्यां तन्त्रशास्त्रस्य देवते।
वागर्थाविवपृक्ताभ्यां याभ्यां च जगतः स्थितिः॥ ३ ॥
कुबेरस्य तनूजन्मा रामपूर्वस्य धीमतः।
मालवीय कुले जातः मालवीयः सुधाकरः।
शक्तिसङ्गमतन्त्रस्य सुधाटीकां तनोम्यहम्॥ ४ ॥

श्रीदेवी ने कहा—हे देव ! हे महादेव ! हे सम्पूर्ण सिद्धियों के प्रवर्त्तक ! आपने रहस्य से भी अत्यन्त रहस्यमय ज्ञान कहा है । हे देवेश ! अब अन्य रहस्यमय ज्ञान कहिये ॥ १ ॥

श्रीशिव उवाच–

रहस्यातिरहस्यं च कथं त्वयि निवेद्यताम् ॥ २ ॥
तथापि तव सद्भक्त्या रहस्यमपि कथ्यते ।

दशमहाविद्याकथनम्

काली तारा छिन्नमस्ता सुन्दरी बगला रमा ॥ ३ ॥
मातङ्गी भुवना सिद्धविद्या च भैरवी तथा ।
धूमावती च दशमी महाविद्या दश स्मृताः ॥ ४ ॥

श्रीशिवजी ने कहा—रहस्य से भी रहस्यमय ज्ञान आपसे किस प्रकार कह सकता हूँ । फिर भी आपकी भक्ति से प्रसन्न होने के कारण अन्य रहस्य ज्ञान भी कहता हूँ । १. काली, २. तारा, ३. छिन्नमस्ता, ४. सुन्दरी, ५. बगला, ६. रमा, ७. मातङ्गी, ८. भुवना, ९. सिद्धविद्या भैरवी और १०. धूमावती—ये कुल दस महाविद्या बतलाई गई हैं ॥ २-४ ॥

चण्डेश्वरी लघुश्यामा त्रिपुटादिप्रयोगतः ।
त्रयोदश महाविद्याः श्रृणुष्व षोडशीं प्रिये ॥ ५ ॥

११. चण्डेश्वरी, १२. लघुश्यामा तथा १३. त्रिपुटा इनका भी प्रयोग होने के कारण कुल तेरह महाविद्यायें कही गई हैं । अब हे प्रिये ! कुल १६ महाविद्याओं को सुनिए ॥ ५ ॥

षोडशमहाविद्याकथनम्

दश पूर्वांस्तु संगृह्य वनदुर्गां च शूलिनीम् ।
अश्वारूढां महाविद्यां त्रैलोक्यविजयाभिधाम् ॥ ६ ॥
वाराहीमन्नपूर्णां च कलासंख्याः प्रकीर्तिताः ।
महाकालमते देवि एकपञ्चाशदीरिताः ॥ ७ ॥

पूर्व में कही गई दश महाविद्याओं को लेकर १४. वनदुर्गा शूलिनी इसके अतिरिक्त हैं, जो घोड़े पर सवार होकर त्रिलोकी का विजय करती हैं । वह अश्वारूढा तथा १५. महाविद्या वाराही और १६. अन्नपूर्णा कुल मिलाकर कला संख्या (१६) महाविद्यायें कही गई हैं । हे देवि ! महाकाल के मत में कुल ५१ संख्या में महाविद्यायें कही गई हैं ॥ ६-७ ॥

महालक्ष्मीं समारभ्य महाकामकलान्तकम् ।
विद्यासंख्या त्वया प्रोक्ता त्रितयं पूर्ववद्भवेत् ॥ ८ ॥

आपके द्वारा अब तक महालक्ष्मी से आरम्भ कर महाकामकला पर्यन्त विद्या की संख्या बतलाई गई हैं । इस प्रकार पूर्व को लेकर कुल तीन भेद महाविद्याओं के कहे गये ॥ ८ ॥

एतासामङ्गमन्त्राः

एतासामङ्गमन्त्रांश्च कथयामि शृणु प्रिये ।
कालीविद्या सिद्धविद्या सर्वविद्योत्तमोत्तमा ॥ ९ ॥

अब हे प्रिये ! इनके अङ्गमन्त्रों को कहता हूँ सुनिए । काली विद्या सिद्धविद्या है—यह सर्वोत्तमोत्तमा महाविद्या हैं ॥ ९ ॥

१. कालीविद्याङ्गमन्त्राः

तत्क्रमः कथ्यते देवि यथायोगेन साम्प्रतम् ।
आदौ स्पर्शमणिर्देवि ततश्चिन्तामणिर्भवेत् ॥ १० ॥

१. कालीविद्याङ्ग मन्त्र—हे देवि ! अब उनका क्रम यथायोग कहता हूँ । सर्वप्रथम १. स्पर्शमणि उसके पश्चात् २. चिन्तामणि ॥ १० ॥

सिद्धकाली ततः प्रोक्ता विद्याराज्ञी तदुत्तरा ।
ततः कामकलाकाली हंसकाली ततः शिवे ॥ ११ ॥
गुह्यकाली तदन्ते स्याद् दशभेदाऽपि पार्वति ।

३. सिद्धकाली, ४. विद्याराज्ञी, फिर ५. कामकलाकाली, इसके बाद हे शिवे ! ६. हंसकाली गुह्यकाली इसके बाद भी उनके दश भेद होते हैं ॥११-१०॥

लघुश्यामा महाकाली बटुकोन्मत्तभैरवः ॥ १२ ॥
नित्यामन्त्राः पञ्चदशा कुल्लुकापञ्चवर्गकम् ।
त्रैलोक्यविजयामन्त्रस्तथा ह्याद्येश्वरीमनुः ॥ १३ ॥
पारायणानां षट् संख्या क्षेत्रेषो गणयोगिनी ।
त्रिशक्तिविद्या देवेशि तथा श्रीगुरुपादुका ॥ १४ ॥
बगला शरभः शास्ता तथा मधुमती वरा ।
रजकः सुरतेशी च मञ्जुघोषमहेश्वरी ॥ १५ ॥
चिटिविद्या भगेशी च पुष्पकुण्डा परा शिवे ।
पञ्च षोढा सहस्रार्णा द्विशतार्णा महेश्वरी ॥ १६ ॥
कालरात्रिर्महेशानि बगलारात्रिरेव च ।

मण्डलानां चतुष्कं च यथायोगेन योजयेत्॥ १७ ॥
एतेऽङ्गमन्त्राः सम्प्रोक्ताः कालिकाजपकर्मणि ।

लघुश्यामा, महाकाली, वटुक, उन्मत्त भैरव, १५ नित्या मन्त्र, कुल्लुका के पञ्चवर्ग, फिर त्रैलोक्यविजया मन्त्र, इसके बाद आद्येश्वरी मन्त्र, ६ पारायणों की संख्या, क्षेत्रेष, गणयोगिनी, त्रिशक्तिविद्या, श्रीगुरुपादुका विद्या, बगला, शरभ, शास्ता, मधुमती, रजक, सुरतेशी, मञ्जुघोषा, महेश्वरी, चिटिविद्या, भगेशी, पुष्पकुण्डा, परा, पञ्चार्णा, षोढार्णा, सहस्रार्णा, द्विशतार्णा, कालरात्री, बगलारात्रि । इनमें यथायोग ४ मण्डलों को भी सम्मिलित कर लेवे । यहाँ कालिका के जप में इतने अङ्गमन्त्रों को कहा गया है ।। १२-१८ ।।

एते मूलमनोरादौ जप्या देव्यश्च सर्वशः॥ १८ ॥
महाविद्याविधौ देवि नाङ्गाङ्गित्वप्रकल्पना ।

ये सभी अङ्गमन्त्र देवी के मूलमन्त्र के जप से पहले जप करे । हे देवि ! किन्तु महाविद्या के जप के विषय में अङ्गाङ्गिभाव की कल्पना न करे ।। ११-१९ ।।

देव्युवाच–

उपविद्यां समासाद्य जपिष्यन्ति नराधमाः ॥ १९ ॥
यथोक्तं नहि कुर्वन्ति देवदूषणतत्पराः ।
सर्वा अपि महाविद्या एकरूपा निरन्तरम्॥ २० ॥

श्रीदेवी ने कहा—अधम मनुष्य उपविद्या को प्राप्त कर उसका जप करेंगे । देवताओं को दूषित करने में तत्पर ऐसे नीच (पाखण्डी) लोग ऊपर कही गई शास्त्रीय विधि के अनुसार कोई अनुष्ठान न करेंगे । जप की सभी महाविद्याओं का स्वरूप निरन्तर एक समान ही कहा गया है ।। १९-२० ।।

प्रोक्तं(एवं) कादिमताख्यस्य प्रोक्तं मुख्याङ्गमादरात् ।
अथ हादिमताख्यस्य रूपं सम्प्रतिपाद्यते॥ २१ ॥

यहाँ तक हमने कादि मत में कहे गये मुख्य अङ्गों को आदरपूर्वक कहा । अब हादि मत के स्वरूप का प्रतिपादन करता हूँ ।। २१ ।।

हादिमताख्यस्य स्वरूपकथनम्

काद्यं मतं कादिमतं विराडनुत्तरं मतम् ।
हाद्यं हादिमतं देवि हंसराजभिधं शिवे॥ २२ ॥

हादि मत का स्वरूप निरूपण—जिसमें 'क' आदि में हो वह कादि मत कहा गया है । यह मत विराट् के पश्चात् कहा गया है । 'ह' जिसके आदि में हो वह हादि मत है । हे देवि ! उसे हंसराज भी कहा गया है ।। २२ ।।

स्वराडुत्तरतन्त्रं तु त(द)एव परिकीर्तितम् ।
कादि हादि मिलित्वा तु कहेत्येव महामनुः ॥ २३ ॥

उसी को स्वराड् उत्तर तन्त्र भी कहा गया है । कादि तथा हादि दोनों मतों के मिल जाने पर उसे 'कह' महामन्त्र भी कहा जाता है ॥ २३ ॥

कहेत्येव महामन्त्रस्तूत्तराम्नायगोचरः ।
उत्तराम्नायराज्ञी च महोग्रतारिणी स्मृता ॥ २४ ॥

'कह' यह महामन्त्र उत्तर आम्नाय में दिखाई पड़ता है अतः उत्तराम्नाय राज्ञी को ही महोग्रतारिणी कहा जाता है ॥ २४ ॥

या तारा सैव छिन्ना स्यात् सैव श्रीत्रिपुराम्बिका ।
सैव काली सैव तारा न भेदोऽस्ति महेश्वरि ॥ २५ ॥

जो तारा है वही छिन्नमस्ता हैं और वही त्रिपुराम्बिका भी कही जाती हैं जो काली हैं वही तारा हैं । हे महेश्वरि ! उनमें भेद नहीं है ॥ २५ ॥

पारायणादिकं देवि तारायां कारयेत् प्रिये ।
तारा कहस्वरूपत्वान्महानीलसरस्वती ॥ २६ ॥

हे प्रिये ! पारायणादिक कर्म तारा के अनुष्ठान में करावे । तारा ही 'कह' स्वरूपा है और वही महानीलसरस्वती भी है ॥ २६ ॥

तारायामपि देवेशि साम्राड्भेदाश्च कीर्तिताः ।
इति संक्षेपतः प्रोक्तमङ्गमन्त्रान् शृणु प्रिये ॥ २७ ॥

हे देवेशि ! 'तारा' देवी में भी साम्राड् भेद कहे गये हैं । यहाँ तक संक्षेप में देवियों और मन्त्रों के विषय में कहा गया है । अब हे प्रिय ! अङ्ग-मन्त्रों के विषय में सुनिए ॥ २७ ॥

२. ताराङ्गमन्त्राः

आदौ तु स्पर्शतारा स्यात्ततश्चिन्तामणिः स्मृतः ।
ततः सिद्धजटा प्रोक्ता उग्रतारा तदुत्तरम् ॥ २८ ॥
हंसतारा ततो देवि निर्वाणरूपिणी कला ।
महानीला महेशानि नीलशाम्भवरूपिणी ॥ २९ ॥

२. ताराङ्ग मन्त्र—सर्वप्रथम १. स्पर्शतारा इसके बाद २. चिन्तामणि, फिर ३. सिद्धजटा, फिर उसके बाद ४. उग्रतारा, फिर ५. हंसतारा, फिर ६. निर्वाणरूपिणी कला, फिर हे महेशानि ! ७. महानीला, फिर ८. नीलशाम्भवरूपिणी कही गई हैं ॥ २८-२९ ॥

दिव्यसाम्राज्यभूषिताकथनम्

महानीलोत्तरं देवि पूर्वसाम्राड्द्वयं शिवे ।
त्रयं मिलित्वा देवेशि दिव्यसाम्राज्यभूषिता ॥ ३० ॥

दिव्यसाम्राज्यभूषिता निरूपण—हे देवि ! महानील के पश्चात् दो पूर्व साम्राड् कहे गये हैं । हे देवेशि ! हे शिवे ! इन तीनों को मिला देने पर वे दिव्य साम्राज्यभूषिता कही जाती है ॥ ३० ॥

कादि हादि च सर्वत्र दिव्यासाम्राट् कलौ नहि ।
दिव्यसाम्राट् कलौ चेत् स्यात्तच्च सत्ययुगं भवेत् ॥ ३१ ॥

अन्य युगों में 'कादि हादि' विद्या दिव्या साम्राट् कही गई हैं किन्तु कलियुग में नहीं । यदि दिव्य साम्राट् कलि मे भी हो तो कलि सत्ययुग हो जावे ॥ ३१ ॥

चिन्तामणिमन्त्रकथनम्

एकाक्षरी तारमायाबिन्दुचन्द्रविभूषिता ।
कूर्चयुग्मं स्पर्शमणिश्चण्डघण्टा च हूंकृतिः ॥ ३२ ॥
महाचिन्तामणिः प्रोक्तस्ततः सिद्धजटा भवेत् ।
मूलविद्या हंसतारा महानीला तदुत्तरम् ॥ ३३ ॥

एक अक्षर वाले तार (ॐ) माया (ह्रीं) जो चन्द्र से बिन्दु से विभूषित हो, फिर दो कूर्च (हुँ हुँ), फिर स्पर्शमणि, फिर चण्डघण्टा, फिर हुङ्कार यह चिन्तामणि मन्त्र कहा गया है । इसके बाद सिद्धजटा कहा गया है । इसके बाद मूलविद्या, फिर हंसतारा, फिर महानीला बतलाई गई हैं ॥ ३२-३३ ॥

ताराभेदनिरूपणम्

एवमन्यानि कथ्यन्ते रहस्यान्यपि पार्वति ।
बटुकः क्षेत्रपश्चैव गणपो योगिनी तथा ॥ ३४ ॥
अक्षोभ्यो विजया वह्निस्तथैव चण्डघण्टिका ।
श्रीषोढापञ्चकं देवि कामसोमादयस्तथा ॥ ३५ ॥
कुल्लुकापञ्चकं देवि तथार्द्रपट्टिका मता ।
शिवाघोरौ पाशुपतं चक्रं तु जयदौर्गकम् ॥ ३६ ॥
अमोघफलदा यक्षी तथा पद्मावती शिवा ।
उद्धटाम्बा बौद्धनाथः पार्श्वनाथस्तथैव च ॥ ३७ ॥
काली छिन्ना च बगला ताराभेदाश्च सर्वशः ।

ताराभेद निरूपण—हे पार्वति ! इस प्रकार अन्य भी रहस्य कहे गये हैं । जैसे बटुक, क्षेत्रपाल, गणेश, योगिनियाँ (६४) अक्षोभ्य, विजया, अग्नि,

चण्डघण्टा, श्रीषोढापञ्चक, काम सोमादि, कुल्लुका पञ्चक, आर्द्रपट्टिका, शिव, अघोर, पाशुपत, चक्र, जयदुर्गा, अमोघफलदा, यक्षी, मद्मावती, शिवा, उद्धटा, अम्बा, बौद्धनाथ, पार्श्वनाथ, काली, छिन्ना और वगला—ये सभी तारा के ही भेद हैं ॥ ३४-३७ ॥

तारिणी यक्षिणी प्रोक्ता मञ्जुघोषो महेश्वरः ॥ ३८ ॥
प्रत्यङ्गिरा नारसिंही भैरवाष्टकमेव च ।
पञ्चकल्पद्रुमा मन्त्राः सर्वकामफलप्रदाः ॥ ३९ ॥

तारिणी, यक्षिणी, मञ्जुघोषा, महेश्वर, प्रत्यङ्गिरा, नारसिंही और आठ भैरव पञ्चकल्पद्रुम के मन्त्र हैं जो सभी कामनाएँ पूर्ण करने वाले हैं ॥ ३८-३९ ॥

रक्तचामुण्डिका नित्यक्लिन्ना विद्या तथैव च ।
महाकालक्रमेणैव कथितं पीतशारदे ॥ ४० ॥

रक्तचामुण्डिका नित्याक्लिन्ना विद्या ये सभी उसी प्रकार पीतशारदा नामक तन्त्रग्रन्थ में महाकाल क्रम से कहे गये हैं ॥ ४० ॥

राज्यवश्यकरा मन्त्रास्तथान्ये खड्गजातयः ।
लुलायखरशार्दूलकरिवश्यकरास्तथा ॥ ४१ ॥

इतने मन्त्र राजाओं को वश में करने वाले हैं । अन्य मन्त्र खड्ग जाति वाले हैं जो लुलाय (?), खर (गदहा), शार्दूल तथा हाथियों को वश में करने वाले हैं ॥ ४१ ॥

धनुर्विद्या शस्त्रविद्या काण्डाग्निजलस्तम्भनाः ।
भयद्वादशहारिण्यस्ता अङ्गमनवः स्मृताः ॥ ४२ ॥

इसके साथ धनुर्विद्या, शस्त्रविद्या एवं काण्डाग्नि तथा जल को स्तम्भित कर देने वाले और द्वादश प्रकार के भय को दूर कर देने वाले मन्त्र हैं जो अङ्ग के मन्त्र के नाम से कहे जाते हैं ॥ ४२ ॥

एतेऽङ्गमन्त्राः सम्प्रोक्ता गायत्रीसहिताः शिवे ।
त्रिशक्तिविद्याभेदे तु न भेदोऽस्ति क्वचित् प्रिये ॥ ४३ ॥

हे शिव ! इतने अङ्गमन्त्र गायत्री के सहित कहे गये हैं । हे प्रिये ! त्रिशक्ति विद्या के भेद में कहीं कोई भेद नहीं है ॥ ४३ ॥

त्रिशक्तिविद्याकथनम्

चतुर्विधा त्रिशक्तिस्तु सर्वसिद्धिक्रमेण च ।
आद्या त्रिशक्तिर्देवेशि कालिकादिक्रमेण च ॥ ४४ ॥

त्रिशक्ति विद्या निरूपण—सर्वसिद्धि के क्रम से त्रिशक्ति चार प्रकार की कही जाती हैं । हे देवेशि ! उन चारों में आद्या त्रिशक्ति कालिकादि क्रम से बतलाई गई है ॥ ४४ ॥

काली तारा छिन्नमस्ता त्रिशक्तिकल्पमालिका ।
तारा नीला चैकजटा अक्षोभ्यस्य क्रमेण च ॥ ४५ ॥
डाकिनी वर्णिनी छिन्ना करालस्य त्रिशक्तयः ।
बाला पञ्चदशी षोढा त्रिशक्तिर्वटवासिनः ॥ ४६ ॥

१. काली, तारा, छिन्नमस्ता ये त्रिशक्ति कल्प मालिका क्रम से हैं । २. तारा, नीला और एकजटा अक्षोभ्य के क्रम से त्रिशक्ति हैं । ३. डाकिनी, वर्णिनी एवं छिन्ना ये कराल के मत से तीन शक्तियाँ हैं । ४. बाला, पञ्चदशी और षोढा ये तीन शक्तियाँ वटवासियों के मत की कही गई हैं ॥ ४४-४६ ॥

३. छिन्नाङ्गमन्त्रकथनम्

छिन्नाङ्गमन्त्रा देवेशि कथ्यन्ते शृणु यत्नतः ।
गुरुमन्त्रो मालिनी च कुल्लुकापञ्चकं तथा ॥ ४७ ॥
काली तारा च नकुली मातङ्गी सिद्धसुन्दरी ।
त्रिजटैकजटा श्यामा सभेदा अपि पार्वति ॥ ४८ ॥
विकटा लम्पटा देवि यक्षिणी परिकीर्तिता ।
यक्षस्तु भ्रामको देवि दीपिनी परिकीर्तिता ॥ ४९ ॥
दीपिनी कालिकायां तु गणेशादिचतुष्ककम् ।
बटुकश्च महाकालः क्रोधराजोऽपरोऽपि च ॥ ५० ॥
पार्षन्मण्डलकं देवि महामहिषमर्दिनी ।
भवानी कमलाऽघोरचतुष्कं परमेश्वरि ॥ ५१ ॥
छिन्नाङ्गमन्त्राः कथितः सुन्दर्याः शृणु पार्वति ।

छिन्नमस्ता के अङ्गमन्त्र का निरूपण—हे देवेशि ! अब आपको छिन्नमस्तका के अङ्गमन्त्रों को कहता हूँ उन्हें प्रयत्नपूर्वक सुनिए । गुरुमन्त्र मालिनी, कुल्लुका पञ्चक, काली, तारा, नकुली, मातङ्गी, सिद्धसुन्दरी, त्रिजटा, एकजटा, श्यामा तथा हे पार्वति ! सभेदा, विकटा, लम्पटा, यक्षिणी, भ्रामक, यक्ष, दीपनी, कालिका, गणेश, क्षेत्रपाल, दुर्गादि चार बटुक, महाकाल, क्रोधराज तथा अन्य पार्षन्मण्डलक, महामहिषमर्दिनी, भवानी, कमला तथा हे भवानि ! चार अघोर—ये छिन्नमस्ता के अङ्गमन्त्र कहे गये हैं । हे पार्वति ! अब सुन्दरी के अङ्गमन्त्रों को सुनिए ॥ ४७-५२ ॥

४. सुन्दरीविद्याङ्गमन्त्राः

षष्ठीजयो नाम मन्त्रो मन्त्रपारायणं तथा॥ ५२ ॥
चक्रपारायणं चैव मन्त्रपारायणं तथा।
सहस्रार्णचतुष्कं च तथा सन्ध्याचतुष्टयम्॥ ५३ ॥
पञ्च षोढा परामन्त्रः श्रीविद्या कामसुन्दरी।
बाला चान्त्यक्रमेणैव पराप्रासाद एव च॥ ५४ ॥

सुन्दरी के अङ्गमन्त्र का निरूपण—षष्ठीजय नामक मन्त्र, मन्त्रपारायण, चक्रपारायण मन्त्र पारायण, सहस्रार्ण, चतुष्क, सन्ध्या चतुष्टय, पञ्चमन्त्र, षोढामन्त्र, परामन्त्र, श्रीविद्या मन्त्र, कामसुन्दरी मन्त्र, बाला मन्त्र एवं अन्तिम क्रम से परा प्रासाद के मन्त्र ॥ ५३-५४ ॥

निर्वाणपदवी विद्या कुब्जिका परमेश्वरि।
नवाम्नायमण्डलानि कादौ हादावपि प्रिये॥ ५५ ॥
रश्मिमण्डलकं देवि गायत्रीक्रेंकमन्त्रतः।
विद्यामण्डलकं देवि मन्त्रमण्डलमेव च॥ ५६ ॥
मन्त्रविद्यामण्डलं च महाविद्याभिधं ततः।
साम्राज्यमण्डलं देवि तथा दर्शनमण्डलम्॥ ५७ ॥
मन्त्रमण्डलपूर्वा तु महाविद्या तदन्ततः।
श्रीमूर्तिपादुका चैव समयश्रीपादुका स्मृता॥ ५८ ॥
महाश्रीपादुका देवि निर्वाणपादुकायुगम्।
पराश्रीपादुका देवि वाराहीपादुका तथा॥ ५९ ॥
मातङ्गीपादुका देवि रक्तश्वेतसमाश्रिता।
सर्वसाम्राज्यमेधान्ते दिव्यसाम्राज्यभूषितः॥ ६० ॥

निर्वाण पदवी विद्या, हे परमेश्वरि ! कुब्जिका, नव आम्नाय, मण्डल, कादि, हादि, रश्मि मण्डलक, गायत्री विद्यामण्डल, मन्त्रमण्डल, मन्त्रविद्यामण्डल, महाविद्या नामक मण्डल, साम्राज्यमण्डल, दर्शनमण्डल, पूर्व में महामण्डल, उसके अन्त में महाविद्या, श्रीमूर्त्तिपादुका, समयश्रीपादुका, महाश्रीपादुका, वाराहीपादुका, मातङ्गीपादुका, रक्तश्वेत, समाश्रिता, सर्वसाम्राज्य, मेधा और अन्त में दिव्य साम्राज्यभूषित—ये सुन्दरी के अङ्ग कहे गये हैं ॥ ५५-६० ॥

प्रातर्गणेशं मध्याह्ने वाराही परिकीर्तिता।
सन्ध्यायां राजमातङ्गी अमरी कुण्डली निशा॥ ६१ ॥

प्रात:काल में गणेश की, मध्याह्न में वाराही की और सन्ध्या में राजमातङ्गी की अमर कुण्डली की रात्रि में पूजा करे ॥ ६१ ॥

साधनायां मन्त्रषट्ककथनम्

साधनायां मन्त्रषट्कं क्रमात् सङ्कथ्यते शृणु ।
बालाम्बा बगला काली वाराही कमलेश्वरी ॥ ६२ ॥
पञ्चकामाः शैवविष्णू सर्वे मन्त्रा महेश्वरि ।
महाविद्याया दशकं कुल्लुकापञ्चकं तथा ॥ ६३ ॥
दीपिनी शापनाशश्च प्रसन्नाञ्जलिरेव च ।
अष्टादशसहस्रं च न्यासजालान् प्रविन्यसेत् ॥ ६४ ॥

साधना में प्रयोग हेतु मन्त्र षट्क—हे पार्वति ! अब मैं साधना में प्रयोग किये जाने वाले मन्त्र षट्कों को कहता हूँ उसे सुनिए । बालाम्बा, वगला, काली, वाराही, कमलेश्वरी, पञ्चकाम, शिव और विष्णु के समस्त मन्त्र, महाविद्या के दश मन्त्र, कुल्लुका के पाँच, दीपिनी, शापनाश, प्रसन्नाञ्जलि तथा अट्ठारह हजार न्यास समूहों से न्यास करे ॥ ६२-६४ ॥

सुन्दरी यक्षिणी प्रोक्ता महायक्षी पुलिन्दिनी ।
ब्रह्मास्त्रं पञ्चविद्यास्त्रमस्त्रान्यन्यानि पार्वति ॥ ६५ ॥
राजराजेश्वरो देवि बटुको वारुणीप्रियः ।
नवतत्त्वेश्वरो देवि शरभो विजयेश्वरः ॥ ६६ ॥
वर्णविद्या मण्डलं च हनुमान् भैरवेश्वरः ।
श्रीविद्या कालिका तारा त्रिविधा त्रिगुणक्रमात् ॥ ६७ ॥
दशविद्यैकाक्षराश्च तथा त्रिशक्तिजाः पराः ।
आद्यन्तमध्यभेदेन नवभेदास्त्रिशक्तयः ॥ ६८ ॥

सुन्दरी, यक्षिणी, महायक्षी, पुलन्दिनी, ब्रह्मास्त्र, पञ्चविद्या, अस्त्र मन्त्र हे पार्वति ! इससे भी अन्य राजराजेश्वर, बटुक, वारुणी, प्रिय, नवतत्त्वेश्वरी, शरभ, विजयेश्वर, वर्णविद्या मण्डल, हनुमान्, भैरवेश्वर, श्रीविद्या, कालिका तारा, तीन प्रकार के गुण, दश विद्या, एकाक्षरा, त्रिशक्तिजा आदि, मध्य तथा अन्त के नवभेद से तीन शक्तियाँ हैं ॥ ६५-६८ ॥

त्रिक्रमो यदि चेद् भूयात्तदा कलिहरः शिवः ।
बगलाङ्गमन्त्रा देवेशि कथ्यन्ते स्वेष्टसाधकाः ॥ ६९ ॥

यदि त्रिक्रम, कलिहर शिव होवें तो भी हे देवेशि ! बगला के इतने मन्त्र कहे गये जो अपने इष्ट के साधक हैं ॥ ६९ ॥

५. बगलाङ्गमन्त्राः

मृत्युञ्जयश्च बटुकस्तथैवोत्कीलनं शिवे ।
पञ्चास्त्रं पञ्चब्रह्मास्त्रं कुल्लुकापञ्चकं तथा ॥ ७० ॥
तथाऽपराजिता श्यामा चण्डेशी च हरिद्रवा ।
विडाला यक्षिणी देवि स्तम्भनत्वरिताऽपि च ॥ ७१ ॥
स्वप्नेश्वरी चैकजिह्वा मन्त्रान्ये भैरवादयः ।
गणपाद्याश्च मनवो भिन्नरूपेण सन्ति च ॥ ७२ ॥
कालिकायां च सुन्दर्यां छिन्नायां तारिणीमनौ ।
बगलायां मञ्जुघोषे रौद्रे च बटुके परे ॥ ७३ ॥
न पञ्चायतनं कार्यं मनसाऽपि महेश्वरि ।
मन्त्राङ्गत्वेन सञ्जप्या न पञ्चायतनक्रमात् ॥ ७४ ॥

बगला अङ्गमन्त्र निरूपण—हे शिवे ! मृत्युञ्जय, वटुक, उत्कीलन, पञ्चास्त्र, पञ्चब्रह्मास्त्र, कुल्लुका पञ्चक, अपराजिता, श्यामा, चण्डेशी, हरिद्रवा, विडाला, यक्षिणी, स्तम्भना, त्वरिता, स्वप्नेश्वरी, एकजिह्वा, अन्य भैरवादि मन्त्र और गणपादि मन्त्र—जो भिन्न-भिन्न रूपों में है । कालिका में, सुन्दरी में, छिन्नमस्तका में, तारिणी मन्त्र में, बगला में, मञ्जुघोष में, रौद्र में, वटुक में, हे महेश्वरि ! इनके मन्दिरों में मन से भी पञ्चायतन देवता का निर्माण नहीं करना चाहिए । पञ्चायतन के क्रम से केवल इनके मन्त्रों का ज्ञान कर साधक जप मात्र करे ॥ ७०-७४ ॥

६. महालक्ष्म्याङ्गदेवताकथनम्

इति संक्षेपतः प्रोक्तं महालक्ष्म्यङ्गदेवताः ।
कथ्यन्ते परमेशानि श्रीविष्णुर्गणपोऽण्डजः ॥ ७५ ॥
धनदश्च कुबेरश्च निधिमन्त्रा अपि प्रिये ।

महालक्ष्मी के अङ्गदेवताओं का विवेचन—यहाँ तक संक्षेप में हमने महालक्ष्मी के अङ्गदेवताओं को कहा है । अब हे परमेश्वरी ! श्रीविष्णु, गणपति तथा ब्रह्मा के विषय में कहता हूँ । धनदाता कुबेर निधि मन्त्रों को भी कहूँगा ॥ ७५ ॥

विद्याभेदाश्च देवेशि भुवना वज्ररूपिणी ॥ ७६ ॥
विद्या भोगवती देवि लक्ष्मीनारायणोऽपरः ।
कुल्लुकास्त्रादिकं देवि विष्णुभेदा अपि प्रिये॥ ७७ ॥
अन्नपूर्णा महेशानी विशालाक्षी महेश्वरि ।
कामाक्षी वनराज्ञीति मन्त्रा लक्ष्म्यङ्गदेवताः ॥ ७८ ॥

हे देवेशि ! विद्या के समस्त भेद भुवना, वज्ररूपिणी, विद्या, भोगवती,

लक्ष्मी नारायण और अन्य कुल्लूकास्त्रादि तथा हे प्रिये ! विष्णु के समस्त भेद भी अन्नपूर्णा, महेशानी, विशालाक्षी, कामाक्षी, वनराज्ञी के मन्त्र—ये सभी महालक्ष्मी के अङ्गदेवता कहे गये हैं ।। ७५-७८ ।।

७. मातङ्ग्याङ्गमन्त्राः

मातङ्ग्या अङ्गमन्त्राश्च नकुली च सरस्वती ।
मातङ्गी पादुका देवि लघुश्यामा च कामिनी ।। ७९ ।।
वीरभद्रो मतङ्गश्च प्रमदा मोहिनी परा ।
भोगेशो यक्षः सम्प्रोक्तो भुवनायां शृणु प्रिये ।। ८० ।।

मातङ्गी के अङ्गमन्त्र—नकुली, सरस्वती, मातङ्गी, पादुका, लघुश्यामा, कामिनी, वीरभद्र, मतङ्ग, प्रमदा, मोहिनी, भोगेश और यक्ष—हे प्रिये ! इतने मन्त्र कहे गये । हे प्रिये ! अब भुवना के विषय में जानिए ।। ७९-८० ।।

८. भुवनाङ्गमन्त्राः

शिवः शिवा विधाता च त्रिपुटा बटुकस्तथा ।
कुल्लुकापञ्चकं देवि पञ्चायतनमेव च ।। ८१ ।।
गौरी श्रीरञ्जिनीमन्त्रो विद्याभेदाः सशक्तयः ।
लोकपालादिमनवो वाणीमन्त्रास्तथा प्रिये ।। ८२ ।।
हयग्रीवः पिङ्गली च खड्गरावण एव च ।
एतेऽङ्गमन्त्राः सम्प्रोक्ताः सिद्धविद्याविधौ शृणु ।। ८३ ।।

भुवना विद्या के अङ्गमन्त्र कथन—शिव, शिवा, विधाता, त्रिपुटा, वटुक, कुल्लुका पञ्चक, पञ्चायतन, गौरी, श्रीरञ्जिनी मन्त्र, शक्ति सहित विद्या के समस्त भेद, लोकपालादि के मन्त्र, वाणी के मन्त्र, हयग्रीव, पिङ्गली और खड्गरावण इतने अङ्गमन्त्र कहे गये हैं । अब सिद्धविद्या के विषय में सुनिए ।। ८१-८३ ।।

९. सिद्धविद्याभैरवीविद्याङ्गमन्त्राः

पुलिन्दिनी भैरवश्च उच्छिष्टगणपस्तथा ।
पिशाचगणपो देवि उच्छिष्टभैरवोऽपरः ।। ८४ ।।
मातङ्गी नकुली रत्नविद्या वाग्वादिनी तथा ।
महामधुमती देवि तथा कर्णपिशाचिनी ।। ८५ ।।
एकवीरा च त्वरिता ढुण्ढिराजो निशाकरः ।
अघोरः कुल्लुकानां च पञ्चकं परिकीर्तितम् ।। ८६ ।।

सिद्धविद्या विधि में अङ्गमन्त्र विवेचन—पुलन्दिन, भैरव, उच्छिष्ट गणपति, पिशाच, गणप, उच्छिष्ट भैरव, मातङ्गी, नकुली, रत्नविद्या, वाग्वादिनी,

महामधुमती, कर्णपिशाचिनी, एकवीरा, त्वरिता, ढुण्ढिराज, निशाकर, अघोर और कुलूक-पञ्चक इतने मन्त्र कहे गये हैं ॥ ८४-८६ ॥

९. भैरव्याङ्गमन्त्राः

श्रीभैरव्याश्चाङ्गमन्त्राः कथ्यन्ते शृणु पार्वति ।
गणपश्च तथा दुर्गा क्षेत्रपो दक्षिणाप्रियः ॥ ८७ ॥
हयग्रीवेश्वरी विद्या विद्याभेदा महेश्वरि ।
बटुको भैरवः शम्भुः पञ्चानां पञ्चिका तथा ॥ ८८ ॥
रश्मिमण्डलषट्कं च विद्यापञ्चाशदेव च ।

भैरवी के अङ्गमन्त्र—हे पार्वति ! अब श्री भैरवी के अङ्गमन्त्रों को कहता हूँ उसे सुनिए । गणपति, दुर्गा, क्षेत्रप, दक्षिणाप्रिय, हयग्रीवेश्वरी, विद्या, विद्या के भेद, वटुक भैरव, शम्भु, पञ्चकी पञ्चिका, रश्मिमण्डलषट्क और पचास विद्यायें ये अङ्गमन्त्र कहे गये हैं ॥ ८७-८९ ॥

१०. धूमावत्यङ्गमन्त्राः

धूमावत्यङ्गमन्त्राश्च वीरेशो बटुकः शिवः ॥ ८९ ॥
प्रत्यङ्गिरा च शरभस्तथा पाशुपतं शिवे ।
संहारास्त्रं कुक्कुटी च तथा मर्कटिका शिवे ॥ ९० ॥
मारिणीत्वरिता विद्या कुल्लुकापञ्चकं शिवे ।
दशविद्याविधौ देवि क्रमादङ्गादि कीर्तितम् ॥ ९१ ॥

दशविद्या विधि में धूमावती के अङ्गमन्त्र—१. वीरेश, २. वटुक, ३. शिव, ४. प्रत्यङ्गिरा, ५. शरभ, ६. पाशुपत, ७. संहारास्त्र, ८. कुक्कुटी, ९. मर्कटिका, १०. मारिणी त्वरिता विद्या और ११. कुल्लूका-पञ्चक—हे शिवे ! इतने दश महाविद्या के विधान में क्रमशः अङ्गमन्त्र कहे गये हैं ॥ ८९-९१ ॥

पूर्णाभिषेकयुक्तानां सर्वेषां जप इष्यते ।
अन्येषामङ्गमन्त्राणां जपः सङ्कीर्तितो मया ॥ ९२ ॥

जिनका पूर्णाभिषेक हुआ है उनका सभी के मन्त्रों के जप में अधिकार है और अन्य अङ्ग मन्त्रों के जप के विषय में मैं पहले कह आया हूँ ॥ ९२ ॥

पूर्णाभिषेकसंयुक्तो यं यं मन्त्रं जपेच्छिवे ।
तमेव सिद्धं जानीयान्नात्र कार्या विचारणा ॥ ९३ ॥

पूर्णाभिषेक युक्त साधक जिन-जिन मन्त्रों का जप करता है उसे सिद्ध समझना चाहिये इस विषय में विचार की आवश्यकता नहीं है ॥ ९३ ॥

पञ्चायतनपक्षे तदङ्गद्वारदेवतामन्त्रकथनम्

पञ्चायतनपक्षे तु तदङ्गद्वारदेवता ।
यथा गुरोर्दत्तमन्त्रास्तदेवाङ्गं प्रकीर्तितम् ॥ ९४ ॥

पञ्चायतन के अङ्गदेवता एवं उनका मन्त्र विधान—पञ्चायतन के पक्ष में उनके अङ्गद्वार के देवता गुरु के द्वारा दिये गये जैसे मन्त्र हैं वे ही अङ्गदेवता कहे गये हैं ॥ ९४ ॥

एवं दर्शनमार्गे तु द्वास्थमूर्तिस्थिता अपि ।
अर्धनारीश्वरे देवि शिवशक्तिप्रभेदतः ॥ ९५ ॥
नृसिंहत्रिपुरायां तु तद्द्वयोक्ताङ्गदेवताः ।
श्रीमहाकामसुन्दर्यां तद्द्वयोक्ताः प्रकीर्तिताः ॥ ९६ ॥

इस प्रकार दर्शन के मार्ग में स्थित रहने वाले भी अर्धनारीश्वर में शिवशक्ति के भेद से होते हैं । इसी प्रकार नृसिंह एवं त्रिपुरा में भी वही दो अङ्गदेवता जानना चाहिये । श्रीमहाकामसुन्दरी में भी यही दो देवता अङ्गदेवता होते हैं ॥ ९५-९६ ॥

हयग्रीवे च सुन्दर्यां तथैव शिवसुन्दरी ।
गोपालसुन्दरी विद्या तथैव कालसुन्दरी ॥ ९७ ॥
एतद्विद्याविधौ देवि तद्द्वयोक्ताङ्गदेवताः ।

हे देवि ! उसी प्रकार हयग्रीव में और सुन्दरी में भी १. शिव-सुन्दरी, २. गोपाल-सुन्दरी विद्या में काल-सुन्दरी—ये दो-दो इस विद्या के विधान में अङ्गदेवता जानना चाहिये ॥ ९७ ॥

बालायोगात् पञ्चदशी तथैव षोडशी शिवे ॥ ९८ ॥
एतद्योगात् त्रिधा विद्या कीर्तिता परमेश्वरि ।
श्रीलोकसुन्दरी देवि सैव वै स्पर्शसुन्दरी ॥ ९९ ॥

बाला के योग से पञ्चदशी तथा षोडशी को जोड़ देने से वह तीन प्रकार की हो जाती है । हे देवि ! जो श्रीलोकसुन्दरी है वही स्पर्शसुन्दरी भी हैं ॥ ९८ ॥

बालायुक्ता स्पर्शमयी ह्याद्यन्तक्रमयोगतः ।
विद्यायुक्ता सुन्दरी तु पुमाद्यन्तक्रमेण च ॥ १०० ॥

आदि और अन्त में बाला युक्ता होने पर वह स्पर्शमयी कही जाती है । आदि और अन्त के क्रम से विद्या युक्ता सुन्दरी पुरुष स्वरूपा हो जाती है ॥ ९९-१००॥

श्रीमहाषोडशीयुक्ता महाचित्षोडशी परा ।
इति संक्षेपतः प्रोक्तं गुह्यकाल्यां विशेषतः ॥ १०१ ॥

महाषोडशी से युक्त हो जाने पर वही चित् महाषोडशी परा हो जाती है। यहाँ तक संक्षेप में कहा गया है। अब गुह्यकाली में कुछ विशेषता बतलाते हैं ॥ १०१ ॥

गुह्यकाल्यां विशेषकथनम्

सङ्कर्षणी सिद्धकाली कुब्जिका सुन्दरी तथा।
श्रीमहासिद्धयोगेशी श्रीमत्सिद्धकरालिका ॥ १०२ ॥
प्रत्यङ्गिरा शेषिका च शेषमन्त्रोऽपि पार्वति।
नवाम्नायादिमन्त्राश्च विज्ञेयाः कालिकामनौ ॥ १०३ ॥

गुह्यकाली में विशेष कथन—१. सङ्कर्षणी, २. सिद्धकाली, ३. कुब्जिका, ४. सुन्दरी, ५. श्रीमहासिद्ध-योगेशी, ६. श्रीमत्सिद्धिकरालिका, ७. प्रत्यङ्गिरा, ८. शेषिका—ये गुह्यकाली में विशेष हैं। हे पार्वति ! इस प्रकार शेष मन्त्र भी तथा नवाम्नाय आदि मन्त्र भी कालिका विद्या के मन्त्र जानना चाहिये ॥ १०२-१०३ ॥

नववक्त्रं महेशानि गुह्यकाल्यां महेश्वरि।
कुब्जिका द्विविधा देवि सकला निष्कला क्रमात् ॥ १०४ ॥

हे महेश्वरि ! हे महेशानि ! गुह्यकाली नव मुखों वाली है। कुब्जिका के दो भेद हैं जो क्रमशः १. सकला और २. निष्कला कहे जाते हैं ॥ १०४ ॥

निष्कला चन्द्रवक्त्रा स्यात् सकला षण्मुखा मता।
तथैव गुह्यकाली तु सकला निष्कला शिवे ॥ १०५ ॥

१. निष्कला का मुखमण्डल चन्द्रमा के समान है और २. सकला छह मुखों वाली हैं उसी प्रकार गुह्यकाली भी, हे शिवे ! सकला एवं निष्कला हैं ॥ १०५ ॥

एकवक्त्रा कलाहीना दशवक्त्रा कलायुता।
गुह्यकाल्याः परिज्ञानात् कादिहादिमतेश्वरः ॥ १०६ ॥

जिसके एक ही मुख हैं वह कला से हीन गुह्यकाली हैं और जो दश मुखों वाली हैं वह कला से युक्त हैं। गुह्यकाली को जान लेने पर साधक कादि एवं हादि दोनों मतों का ईश्वर हो जाता है ॥ १०६॥

महापाशुपतेशी मा महाविद्या महाकला।
संवर्तेशक्रमेणैव नवतत्त्वेश्वरी परा ॥ १०७ ॥

जो महापाशुपतेशी हैं वही महाविद्या हैं और महाकला हैं। संवर्त्तेश के मत में वही नवतत्त्वेश्वरी परा भगवती हैं ॥ १०७ ॥

कालनाथक्रमेणैव नवतत्त्वेश्वरी परा।
अद्वैतभावसम्पन्ना श्रीमहागुह्यकालिका॥ १०८ ॥

कालनाथ के क्रम से भी वही नवतत्त्वेश्वरी तथा परा है । इस प्रकार श्री महागुह्य कालिका ही अद्वैत भाव से सम्पन्न है ॥ १०८ ॥

पीठवाणीप्रभेदेन शाम्भवानां च विंशतिः ।
लिपिभाषाप्रभेदेन शाम्भवानां च विंशतिः ॥ १०९ ॥
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ।

॥ इति श्रीशक्तिसङ्गममहातन्त्रे उत्तरभागे चतुर्थखण्डे श्रीमदक्षोभ्यमहोग्रतारा-संवादे (विषयनिर्देशो) नाम प्रथमः पटलः ॥ १ ॥

* * *

पीठ और वाणी के भेद-प्रभेद से बीस शम्भु माने गये हैं । लिपि एवं भाषा के प्रभेद से भी शाम्भवों के बीस भेद कहे गये हैं । हे देवि ! यहाँ तक विषयनिर्देश संक्षेप में कह दिया गया है । अब आप और क्या सुनना चाहती हैं ॥ १०९ ॥

॥ इस प्रकार श्रीशक्तिसंगममहातन्त्र के उत्तरभाग में छिन्नमस्ता चतुर्थ खण्ड के श्रीमदक्षोभ्यमहोग्रतारासंवाद में महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय कृत 'विषयनिर्देश' नामक प्रथम पटल की 'सुधा' नामक हिन्दी व्याख्या पूर्ण हुई ॥ १ ॥

* * *

द्वितीयः पटलः

विद्यापीठनिर्णयकथनम्

श्रीदेव्युवाच–

देवेश श्रोतुमिच्छामि पूर्वमुक्तं रहस्यकम्।

* सुधा *

श्रीदेवी ने कहा—हे देवेश ! अब मैं उस रहस्य को जानना चाहती हूँ जिसका नाम आपने पहले कहा है ॥ १ ॥

श्रीशिव उवाच–

रहस्यातिरहस्यं च कथ्यते शृणु पार्वति ॥ १ ॥

श्रीशिवजी ने कहा—हे पार्वति ! रहस्य से भी अत्यन्त महत्त्वशाली रहस्य कहता हूँ उसे सुनिए ॥ १ ॥

पूर्णदीक्षाविधौ अधिकारविधानम्

डामरद्वयमन्त्राश्च उड्डीशद्वयगोचराः।
तथाऽन्येऽपि महामन्त्राः पूर्णदीक्षाविधौ शिवे॥ २ ॥
अधिकारो भवेत्तेषां नात्र कार्या विचारणा।
विद्यापीठनिर्णयस्तु सोऽपि सङ्कथ्यते शृणु॥ ३ ॥

दीक्षित साधक का अधिकार विवेचन—हे शिवे ! जिन्हें पूर्ण दीक्षा प्राप्त हो गई है और दोनों (भूतादि) डामरों में तथा दोनों उड्डीशों में कहे गये मन्त्रों में एवं अन्यत्र कहे गये मन्त्रों में उनका अधिकार होता है । इसमें विचार की आवश्यकता नहीं । अब रही बात विद्यापीठ के निर्णय की उसे कहता हूँ सुनिए ॥ २-३ ॥

विद्यापीठनिर्णयकथनम्

यत्र नोक्तं भवेत् पीठं शक्तिपीठं च तत्र वै।
इदं शक्तिविधौ प्रोक्तं शैवे पञ्चाक्षरोद्भवम् ॥ ४ ॥
अष्टाक्षरोक्तं विष्णो तु प्रोक्तमेकादशाक्षरम् ।
गणेशे गदितं पीठं सूर्ये घृणिसमुद्भवम् ॥ ५ ॥

क्वचिद् धर्मादिपीठं च क्वचिन्नामादिसम्भवम् ।
यत्र नोक्तं भवेत् पीठं तत्क्रमः परिकीर्तितः ॥ ६ ॥

विभिन्न पीठों का निर्णय—जहाँ किसी पीठ का नाम नहीं लिया गया है वहाँ शक्तिपीठ निर्णीत है यह शक्तिविधि में कहा गया है । शैवपीठ में पञ्चाक्षर पीठ जानना चाहिये और विष्णुपीठ में अष्टाक्षरोक्त पीठ जानना चाहिये । गणेश की पीठ में ११ अक्षरों वाला पीठ जानना चाहिये । सूर्य की पीठ 'घृणि' से उत्पन्न जानना चाहिये । कहीं-कहीं धर्मादिपीठ और कहीं-कहीं पीठ को नाम निर्देशपूर्वक कहा गया है । जहाँ पीठ का नाम नहीं कहा गया है उसका क्रम हम पहले (अर्थात् अन्य खण्डों में) कह आये हैं ॥ ४-६ ॥

चान्द्रे स्वायम्भुवे चीने बौद्धे वैदिकपीठके ।
यत्र नोक्तं भवेत् पीठं निर्णयः परिकीर्तितः ॥ ७ ॥

चान्द्र, स्वायम्भुव, चीन, बौद्ध तथा वैदिक पीठ में जहाँ पीठ का नाम नहीं लिया गया है वहाँ इस प्रकार का निर्णय किया गया है ॥ ७ ॥

ताराकालीक्रमेण पीठनिर्णयकथनम्

ताराकालीक्रमेणैव पीठं सङ्कथ्यते शृणु ।
मेधादिपीठवाक्सिद्ध्यै लक्ष्म्यादि कमलाप्तये ॥ ८ ॥
जयाप्तये जयापीठं ताराविद्याविधौ स्मृतम् ।
काल्याः पीठत्रयं देवि गुह्यकाल्यां निशाकरः ॥ ९ ॥

तारा एवं काली इत्यादि क्रम से पीठ का निर्णय—अब तारा एवं काली इत्यादि क्रम से पीठ का निर्णय सुनिए । वाक्सिद्धि के लिये मेधादि पीठ कहा गया है और कमला प्राप्ति के लिये लक्ष्म्यादि पीठ कहा गया है । जय प्राप्ति के लिये जया पीठ और (शास्त्रों में गति वाली) विद्या प्राप्ति के लिये तारा पीठ का विधान कहा गया है । हे देवि ! काली के लिये तीन पीठ कहे गये हैं और गुह्यकाली के लिये निशाकर पीठ कहा गया है ॥ ८-९ ॥

सुन्दर्यां वेदधा पीठं तारायां द्विविधं भवेत् ।
छिन्नायामेकरूपं तु भुवनायामपि प्रिये ॥ १० ॥

सुन्दरी के लिये वेदधा पीठ का विधान बतलाया गया है तथा तारा के लिये दो प्रकार का पीठ विहित है । हे प्रिये ! छिन्ना तथा भुवना के लिये एक समान रूप पीठ कहा गया है ॥ १० ॥

धूम्रायामपि तथा मातङ्ग्यां द्विविधं भवेत् ।
सिद्धविद्याविधौ देवि द्विविधं भैरवीमनौ ॥ ११ ॥

सुन्दरीपीठमाख्यातं धूम्रायामेकमेव च ।
कमलायां द्वयं पीठं शैवे त्रिविधमेव च ॥ १२ ॥

धूम्रा के लिये भी वही प्रकार है तथा मातङ्गी के लिये दो प्रकार के पीठ कहे गये हैं । हे देवि ! सिद्धविद्या के विषय में दो प्रकार की पीठ बतलायी गयी हैं । इसी प्रकार भैरवी मन्त्र में सुन्दरी पीठ कहा गया है तथा धूम्रा में केवल एक ही पीठ का विधान है । कमला के लिये दो पीठ तथा शैव के लिये तीन पीठ विहित हैं ॥ ११-१२ ॥

चतुर्विधं वैष्णवे स्यात् सौरे द्विविधमीरितम् ।
गाणपे पञ्चधा पीठमन्योऽपि पीठविस्तरः ॥ १३ ॥

वैष्णव सम्प्रदाय में चार प्रकार की पीठ होती है । सौर में दो प्रकार की पीठ कही गई है तथा गणेश (गाणपत्य सम्प्रदाय) में पाँच प्रकार की पीठ विहित है । इसके अतिरिक्त अन्य भी पीठ के विस्तार कहे गये हैं ॥ १३ ॥

शैवपीठं च बटुके स्वर्णेशे मृडभैरवे ।
बडवातले वीरभद्रे चान्द्र नामादिकीर्तनम् ॥ १४ ॥

वटुक के लिये शैव पीठ, स्वर्णेश, मृडभैरव, वडवातल, वीरभद्र एवं चान्द्र में उन पीठ के नामों को कहा गया है ॥ १४ ॥

स्वायम्भुवे हिङ्गुलाख्ये पीठं शक्तिमयं मतम् ।
इति संक्षेपतः प्रोक्तं पर्यायनिर्णयं शृणु ॥ १५ ॥

स्वायम्भुव पीठ में तथा हिङ्गुलाख्य पीठ में शक्तिमय पीठ कहा गया है । इस प्रकार यहाँ संक्षेप में पीठनिर्णय कहा गया है । अव पर्याय के विषय में निर्णय सुनिए ॥ १५ ॥

पर्यायनिर्णयकथनम्

आदौ कादिर्महेशानि हादिश्चैव तदुत्तरम् ।
कादिहादिमतत्वेन देशानां द्विविधा गतिः ॥ १६ ॥

कादि एवं हादि के पर्याय—हे महेशानि ! सर्वप्रथम कादि पर्याय उसके पश्चात् हादि पर्याय कहूँगा । कादि तथा हादि के भेद से देशों के भी दो भेद कहे गये हैं ॥ १६ ॥

कादौ षट्पञ्चाशद्देशा हादावपि तथा प्रिये ।
तद्देशशक्तिसंयोगस्तद्राज्यमिति कीर्तितम् ॥ १७ ॥

कादि के ५६ देश कहे गये हैं, हे प्रिये ! हादि के भी उतने ही देश कहे हैं उन-उन देशों के संयोग से उन-उन राज्यों के नाम भी कहे गये हैं ॥ १७ ॥

तत्सङ्गमजपेनैव तद्देशराज्यमाप्नुयात् ।
तत्रादौ कादिदेशाश्च कथ्यन्ते परमेश्वरि ॥ १८ ॥

उस सङ्गम के जप से साधक उन-उन राज्यों को प्राप्त करता हैं । हे परमेश्वरि ! अब मैं सर्वप्रथम कादि देशों को कहा रहा हूँ ॥ १८ ॥

१. कादिमतस्य प्रदेशाः

अङ्गवङ्गौ कलिङ्गश्च कालिङ्गः केरलस्तथा ।
काश्मीरः कामरूपश्च महाराष्ट्रोऽन्ध्र एव च ॥ १९ ॥
सौराष्ट्रो द्रविडश्चैव तैलङ्गमलयाकलौ ।
कार्णाटावन्त्यवैदर्भसर्पा(मर्वा)भीर(ाः)समालवाः॥ २० ॥
चोलपाञ्चालकाम्बोज(ा)वैराट् पाण्ड्योविदेहभूः ।
बाह्लीकश्च किरातश्च कैकटावन्त्यकौ तथा ॥ २१ ॥
ऐराकभोटान्तचीना महाचीनस्तथैव च ।
नेपालः शीलहट्टश्च गौडकोशलमागधाः ॥ २२ ॥
औत्कलाः कुन्तला हूणाःकोङ्कणः कैकयस्तथा।
शूरसेनः कौरवाश्च सिंहलाश्च पुलिन्दकाः ॥ २३ ॥
कच्छसेवनमद्राश्च सौवीरलाटबर्बराः ।
मत्स्यः सैन्धव इत्येतत् षट्पञ्चाशत् प्रकीर्तिताः॥ २४ ॥

कादिमत के प्रदेश—१. अङ्ग, २. वङ्ग, ३. कलिङ्ग, ४. कालिङ्ग, ५. केरल, ६. काश्मीर, ७. कामरूप, ८. महाराष्ट्र, ९. आन्ध्र, १०. सौराष्ट्र, ११. द्रविड़, १२. तैलङ्ग, १३. मलय, १४. कलि, १५. कर्णान्तिक, १६. अवन्ती, १७. विदर्भ, १८. सर्पा, १९. आभीर, २०. मालवा, २१. चोल, २२. पाञ्चाल, २३. काम्बोज, २४. विराट्, २५. पाण्ड्य, २६. विदेह, २७. वाह्लीक, २८. किरात, २९. कैकट, ३०. आवन्त्यक, ३१. ऐराक, ३२. भूटान, ३३. चीन, ३४. महाचीन, ३५. नेपाल, ३६. शिलहट्ट, ३७. गौड़, ३८. कोशल, ३९. मगध, ४०. उत्कल, ४१. कुन्तल, ४२. हूण, ४३. कोङ्कण, ४४. कैकय, ४५. शूरसेन, ४६. कौरव, ४७. सिंहल, ४८. पुलिन्दक, ४९. कच्छ, ५०. सेवन, ५१. मद्रा, ५२. सौवीर, ५३. लाट, ५४. बर्बर, ५५. मत्स्य एवं ५६. सैन्धव—ये ५६ देश कादि कहे गये हैं ॥ १९-२४ ॥

२. हादिमतस्य प्रदेशाः

कादिदेशाः समाख्याता हादिदेशान् शृणु प्रिये ।
अङ्गबङ्गकलिङ्ग(ा)श्चकालिङ्गः स्यात् सुवीरकः॥ २५ ॥

काश्मीरश्चैव काम्बोजः सौराष्ट्रो मगधस्तथा ।
महाराष्ट्रो मालवस्तु नेपालः केरलस्तथा ॥ २६ ॥
चोलपाञ्चालगौडाश्च मलयालश्च सिंहलः ।
द्रविडः कोङ्कणश्चैव कार्णाटो लाट एव च ॥ २७ ॥
मलाटश्चैव पालाटः पाण्ड्यान्धकपुलिन्दकाः ।
हूणकौरवगान्धारविदर्भाः सविदेहकाः ॥ २८ ॥
बाह्लीकबर्बरौ देवि कैकयः कोशलोऽपि च ।
कुन्तलश्च किरातश्च शूरसेनश्च सेवनः ॥ २९ ॥
वनाटः टङ्कणश्चैव कोङ्कणे मत्स्यमद्रकौ ।
मैडसैन्धवसिन्धूत्थाः पार्श्वकीकौ ततः स्मृतौ ॥ ३० ॥
योर्जालयवनौ देवि जलजालन्धसाल्वलाः ।
सिन्धुश्च वन्ध्यदेशश्च हादिपर्यायवाचकाः ॥ ३१ ॥

हादिमत के प्रदेश—यहाँ तक 'कादि' पर्याय के देश कहे गये हैं। अब हे प्रिये ! 'हादि' पर्याय के देशों को सुनिए। १. अङ्ग, २. वङ्ग, ३. कलिङ्ग, ४. कालिङ्ग, ५. सुर्वीरक, ६. काश्मीर, ७. काम्बोज, ८. सौराष्ट्र, ९. मगध, १०. महाराष्ट्र, ११. मालव, १२. नेपाल, १३. केरल, १४. चोल, १५. पाञ्चाल, १६. गौड़, १७. मलय, १८. सिंहल, १९. द्रविड़, २०. कोङ्कण, २१. कार्णाट, २२. लाट, २३. मलाट, २४. पालाट, २५. पाण्ड्यान्धक, २६. पुलिन्दक, २७. हूण, २८. कौरव, २९. गान्धार, ३०. विदर्भ, ३१. विदेह, ३२. वाह्लीक, ३३. वर्वर, ३४. कैकय, ३५. कोशल, ३६. कुन्तल, ३७. किरात, ३८. शूरसेन, ३९. सेवन, ४०. वनाट, ४१. टङ्कण, ४२. कोङ्कण, ४३. मत्स्य, ४४. मद्रक, ४५. मैड, ४६. सैन्धव, ४७. सिन्धूत्थ, ४८. पार्श्व, ४९. कीक, ५०. योर्जाल, ५१. यवन, ५२. जल, ५३. जालन्धर, ५४. साल्वल, ५५. सिन्धु एवं ५६. वन्ध्यदेश—इतने देश हादि मत के पर्यायवाचक हैं ॥ २५-३१ ॥

देशद्वयव्यवस्था तु पूर्वतन्त्रे प्रकीर्तिता ।
देशभेदं च विज्ञाय पर्यायक्रममाचरेत् ॥ ३२ ॥

इन दोनों देशों की व्यवस्था हम पूर्व में तन्त्र में कह आये हैं देश के भेद को जानकर तब वहाँ के पर्याय क्रम का अनुष्ठान करे ॥ ३२ ॥

पर्यायाः सप्त विख्यातास्तानहो वच्मि संश्शृणु ।
देशकालाम्नायविद्या दर्शनायतने तथा ॥ ३३ ॥
तथागमप्रभेदेन पर्यायसप्तकं भवेत् ।

१. देशपर्यायकथनम्

यस्मिन् देशे य आचारस्तद्देशक्रममार्गतः ॥ ३४ ॥
तत्र तन्त्राणि कानि स्युस्तत्र मार्गः कथं स्मृतः ।
एतज्ज्ञानं महेशानि ज्ञात्वा यत्नेन पार्वति ॥ ३५ ॥

देश पर्याय निरूपण—हे देवि ! सात प्रकार वे प्रसिद्ध पर्याय क्रम कहे गये हैं । उन्हें कहता हूँ सुनिए । १. देश, २. काल, ३. आम्नाय, ४. विद्या ५. दर्शन ६. आयतन और ७. आगम के भेद से सात पर्याय कहे गये हैं । जिस देश में जो पूजा के आचार हैं उस देश के क्रम मार्ग का अनुसरण करना चाहिये । उस देश में कौन से तन्त्र हैं? उसका मार्ग कैसा है? हे महेशानि ! हे पार्वति ! प्रयत्नपूर्वक इनका ज्ञान करे ॥ ३३-३५ ॥

तत्तन्त्रसंख्यामार्गेण सम्प्रदायक्रमेण च ।
योजयेत् परमेशानि देशपयार्यविच्छिवः ॥ ३६ ॥

वहाँ के तत्तत् तन्त्रों के संख्या के अनुसार वहाँ के सम्प्रदाय के अनुसार देशकाल का वेत्ता अपने को मिला देवे ॥ ३६ ॥

२. कालपर्यायकथनम्

कस्मिन् काले तु का विद्या कथं जाता किमात्मिका ।
तत्तन्त्राचारयोगेन कालपर्यायवान् भवेत् ॥ ३७ ॥

काल पर्याय विवेचन—देश में किस काल में कौन सी विद्या थी? वह कैसे उत्पन्न हुई? उसका स्वरूप क्या था? इस प्रकार तत् तत् तन्त्राचार के योग से उसके पर्याय का ज्ञान करे ॥ ३७ ॥

३. आम्नायाख्यपर्यायकथनम्

कस्याम्नाये किमाचारः किं रूपं किं विशिष्टता ।
कति तन्त्रादिसंख्या च तथैव यामलादिकम् ॥ ३८ ॥
आम्नायाख्यस्तु पर्यायो ह्येतद्विज्ञानगोचरः ।

आम्नायाख्य पर्याय कथन—किसके आम्नाय () में क्या आचार है? उसकी विशेषता क्या है? उसके तन्त्रों की संख्या कितनी है? उसमें कितने यामल आदि हैं?—यह आम्नाय नामक पर्याय कहा गया जो विज्ञान से जाना जाता है ॥ ३८ ॥

४. विद्यापर्यायकथनम्

का विद्या वा किमाचारा कलौः किं वा स्वरूपिणी ॥ ३९ ॥

विद्या के पर्याय—उस देश में कौन सी विद्या थी? उसका आचार क्या रहा है? कलि में उसका स्वरूप बदल कर कैसा हो गया है? ॥ ३९ ॥

त्रैविध्यं किं युगत्वेन किं गुणा किं विशिष्टता ।
विद्यापर्याय इत्युक्तो दर्शनाख्यं शृणु प्रिये ॥ ४० ॥

क्या युग के अनुसार वे तीन प्रकार के हो गये हैं? उसकी विशिष्टता क्या हैं? यह विद्या नामक पर्याय कहा गया । अब हे प्रिये ! दर्शन नामक पर्याय के विषय में सुनिए ॥ ४० ॥

५. दर्शनाख्यपर्यायकथनम्

किं दर्शनं कथं किं वा किमाचारात्मकं भवेत् ।
कानि तन्त्राणि विद्याश्च एतज्ज्ञानं महेश्वरि ॥ ४१ ॥

दर्शन के पर्याय—उसका दर्शन क्या है? वह कैसे उत्पन्न हुआ? उसका आचार कौन सा है? उसके तन्त्र कौन-कौन से हैं? उसकी विद्या भी क्या है? हे महेश्वरि ! यह ज्ञान नामक पर्याय है ॥ ४१ ॥

६. आयतनपर्यायकथनम्

दर्शनाख्यस्तु पर्याय: प्रोक्त आयतनं शृणु ।
किमायतनकं देवि कथं जातं महेश्वरि ॥ ४२ ॥

आयतन पर्याय निरूपण—यहाँ तक दर्शन नामक पर्याय कहा गया । अब आयतन के विषय में सुनिए । हे देवि ! उस देश का आयतन कैसा है? हे महेश्वरि ! वह आयतन किस प्रकार उत्पन्न हुआ? ॥ ४२ ॥

कियत् तन्त्राणि देवेशि आचार: कीदृशो भवेत् ।
अयमायतनाख्यो हि पर्याय: परिकीर्तित: ॥ ४३ ॥

वहाँ के तन्त्रों की संख्या कितनी है? उसका आचार कैसा है? यह आयतन नामक पर्याय कहा गया ॥ ४३ ॥

७. आगमपर्यायकथनम्

अथागमाख्यपर्यायं शृणु यत्नेन पार्वति ।
को वागम: कथं जात: किमाचार: कथं भवेत् ॥ ४४ ॥

आगम पर्याय निरूपण—हे पार्वति ! अब आगम नामक पर्याय के विषय में सुनिए । उस देश का आगम क्या है? वह किस प्रकार उत्पन्न हुआ? उसका आचार क्या है? आगे चलकर उसका स्वरूप क्या होगा? ॥ ४४ ॥

के मन्त्रा: केऽङ्गमन्त्राश्च पारम्पर्यं कथं भवेत् ।
कियत् तन्त्राणि का सिद्धिरेतज्ज्ञानं च यत्र वै ॥ ४५ ॥

उसके कौन-कौन मन्त्र हैं? कौन-कौन अङ्ग मन्त्र है? उसकी परम्परा किस

प्रकार की रही होगी? वहाँ कितने मन्त्र हैं? किस प्रकार की सिद्धि है? यह ज्ञान नामक पर्याय है ॥ ४५ ॥

अयमागमपर्यायाः कादिहादिमते भवेत् ।
पर्याये कादिहादौ तु क्वचिद् भेदोऽस्ति पार्वति ॥ ४६ ॥

सात आगम के पर्याय कादि तथा हादि के मत में सम्भव है । हे पार्वति ! कादि हादि के मत में कहीं-कहीं भेद भी हैं ॥ ४६ ॥

सर्वमेतन्महेशानि रहस्यातिरहस्यकम् ।
कथ्यते शृणु देवेशि राजयोगोत्तरं शिवे ॥ ४७ ॥

हे महेशानि ! ये सभी रहस्य से बढ़कर अति रहस्यमय हैं । हे देवि ! अब इसके बाद राजयोग के विषय में कहता हूँ ॥ ४७ ॥

राजयोगकथनम्

राजयोगं प्रवक्ष्यामि येन कालीसमो भवेत् ।
प्रतिदेशं महेशानि षट्त्रिंशद् वृत्तयः स्मृताः ॥ ४८ ॥

राजयोग का विवेचन—अब मैं राजयोग के विषय में कहता हूँ । जिससे साधक काली के समान बन जाता है । हे महेशानि ! प्रत्येक देश में ३६ वृत्तियाँ कही गई हैं ॥ ४८ ॥

विमर्शिनी—राजयोगमिति । शक्तियोगोयमत्र 'राजयोग' नाम्ना व्याख्यातः । अत्र 'राजयोगं प्रवक्ष्यामि............' इत्येवं हि समारभ्यते प्रकरणमेतत् चतुर्थे खण्डे । 'ब्रह्मानन्दो महेशानि कलासप्तदशी तु सा । तन्मार्गशक्तियोगाच्च शक्तियोगः प्रकीर्तितः ॥ (२.७६-७७) इत्येवञ्चाग्रे शक्तियोगस्य प्रयोजनमुपदिश्यते ।

षट्त्रिंशद्गुणनं कृत्वा अष्टादशशती भवेत् ।
कादिहादिक्रमेणैव शक्तिबाहुल्यमीरितम् ॥ ४९ ॥

इसे यदि ५० से गुणा कर देवे तो १८०० की संख्या हो जाती है । इस प्रकार कादि तथा हादि के मत में शक्ति बाहुल्य कहा गया ॥ ४९ ॥

अनुक्रमेण देवेशि अथाङ्कुरितयौवना ।
आप्रौढान्तं महेशानि चित्रिण्यादिक्रमेण च ॥ ५० ॥
दिव्यादिव्यक्रमेणैव भेदबाहुल्यमीरितम् ।
पीठानि सरितश्चैव सागराः पर्वतार्णवाः ॥ ५१ ॥
तीर्थानि सकलान्यत्र यथायोगेन योजयेत् ।
नामरूपगन्धभेदैर्विद्याभेदादिकं चरेत् ॥ ५२ ॥

हे देवेशि ! बाल्यावस्था के क्रम से जब शक्ति में यौवन का अङ्कुर उत्पन्न होता है तब हे महेशानि ! चित्रिणी इत्यादि क्रम से प्रौढान्त पर्यन्त दिव्य आदित्य क्रम से उस शक्ति में भेद बाहुल्य होने लगता है । उस शक्ति में साधक समस्त पीठ, समस्त सरितायें, समस्त सागर, समस्त पर्वत और समस्त तीर्थों को यथायोग आवाहित कर उसमें संयुक्त करे । पुनः उसमें होने वाले नाम, रूप एवं गन्ध-भेद से उसमें विद्या के भेदों से उसका नामकरण करे ॥ ५०-५२ ॥

सुन्दरी रमणी रामा ह्लादिनी चञ्चलेक्षणा ।
कटाक्षताडिनी साध्वी सर्वमन्त्रविशारदा ॥ ५३ ॥

सुन्दरी, रमणी, रामा, ह्लादिनी, चञ्चलेक्षणा, कटाक्षताडिनी, साध्वी, सर्वमन्त्र विशारदा और आनन्दामृत कल्लोला । इस प्रकार नाम, रूप एवं गन्ध से उसका नामकरण करे ॥ ५३ ॥

आनन्दामृतकल्लोला यद्देशे पीठसञ्चयः ।
अन्यत्र पीठमेकं तु शक्तौ ब्रह्माण्डपीठकम् ॥ ५४ ॥

यह नामकरण उस स्थान पर करे जहाँ उसके लिये पीठ स्थापित किया गया हो । ऐसे शक्ति के लिये एकमात्र समस्त ब्रह्माण्ड पीठ कहा गया है ॥ ५४ ॥

जीवपीठं महापीठं राजसिंहासनं परम् ।
शक्त्यालापी शक्तिभोगी शक्तिचुम्बनतत्परः ॥ ५५ ॥
शक्त्यानन्दी शक्तिपूजी शक्तिध्यानपरायणः ।
हसन् वदन् स्पृशन् गायन् धावन् क्रीडारसोद्यतः ॥ ५६ ॥
नानाविनोदवाक्यैश्च नानानन्दकरैः शिवे ।
शक्तिमध्ये सदा स्थेयं तामालोक्य जपं चरेत् ॥ ५७ ॥

जीव पीठ, महापीठ एवं राजसिंहासन पीठ इत्यादि अन्य भी पीठ के नाम हैं । शक्त्यालापी, शक्तिभोगी, शक्तिचुम्बनतत्पर, शक्त्यानन्दी, शक्तिपूजी होकर शक्तिध्यान परायण रह कर साधक हँसते हुए, बातचीत करते हुए, स्पर्श करते हुए, गाते हुए, दौड़ते हुए, खेलते हुए तथा अनेक प्रकार के विनोद वाक्यों से आनन्दयुक्त और पदार्थों से युक्त होकर उस शक्ति के मध्य में सर्वदा स्थित रहे । तदनन्तर उसे देखते हुए जप करे ॥ ५५-५७ ॥

दशन् चुम्बंस्तथालिङ्ग्यसम्मर्द्य मथनं परम् ।
आन्दोलिका नदी वाटी नौकायात्रा तथोज्जटे ॥ ५८ ॥
लोकहीने शक्तिसङ्गे यत्र कुत्राप्यचूडके ।
पञ्चमुद्रां चरन् देवि गानमध्ये विशेषतः ॥ ५९ ॥

झूला, नदी, वाटिका, नौकायात्रा तथा कुटी में उसके साथ निवास करे। जहाँ कोई न हो ऐसे निर्जन स्थान में शक्तिसमूह में पञ्चमुद्रा का आचरण करते हुए उसके विशेष रूप से गान के मध्य में वह शक्ति का आराधक निवास करे ॥ ५८-५९ ॥

अहो धन्यवतां मध्ये न धन्यस्तादृशः क्वचित् ।
स राजा स च देवेज्यः स एव स सदाशिवः ॥ ६० ॥

आश्चर्य है उसके समान धन्य लोगों के मध्य में कोई धन्य नहीं है, वही राजा है, वही इन्द्र है और वही सदाशिव है ॥ ६० ॥

स एव देवीरूपो हि शक्तिज्ञाता ममार्थदः ।
सम्राड् भोक्ता स एवात्रस गन्धर्वाधिकः कलौ ॥ ६१ ॥

वही देवी का स्वरूप है, वही शक्ति का ज्ञाता है, तथा सामर्थ्य प्रदान करने वाला है। वही सम्राट् है, भोक्ता है, कलि में वही गन्धर्वों से अधिक शक्तिशाली हैं ॥ ६१ ॥

सिद्धिदाता ऋद्धिदाता स एव शक्तिदर्शकः ।
वेश्यामध्ये सदा स्थेयं राज्यलक्ष्मीस्तु सा परा ॥ ६२ ॥

वही सिद्धिदाता, ऋद्धिदाता तथा शक्ति का दर्शक है। शक्ति का साधक सर्वदा वेश्या के मध्य में निवास करे क्योंकि वह परा राज्यलक्ष्मी है ॥ ६२ ॥

विमर्शिनी—ऋद्धिदाता-शक्तिदाता इति वा पाठः ।

राज्यलक्ष्मीर्मोक्षलक्ष्मीः कीर्तिलक्ष्मीस्तु सापरा ।
वेश्यामण्डलगो भूत्वायं यं मन्त्रं जपेच्छिवे ॥ ६३ ॥
शिवतुल्यो नरो भूयान्नात्र कार्या विचारणा ।
वेश्या सप्तविधा प्रोक्ता यथायोगक्रमेण च ॥ ६४ ॥

वह राज्यलक्ष्मी ही नहीं, मोक्षलक्ष्मी, कीर्त्तिलक्ष्मी तथा परालक्ष्मी भी है। हे शिवे ! साधक वेश्यामण्डल में जाकर जिस-जिस मन्त्र का जप करता है, वह शिवतुल्य हो जाता है इसमें विचार की आवश्यकता नहीं। यथा योग क्रम से वेश्या के सात भेद कहे गये हैं ॥ ६३-६४ ॥

सप्तविधा वेश्याकथनम्

राजवेश्या नृत्यवेश्या तीर्थवेश्या तथाऽपरा ।
गुप्तवेश्या देववेश्या ब्रह्मवेश्या मताऽपरा ॥ ६५ ॥
ग्रामवेश्या सप्तमी स्याद् वेश्या सप्तविधा भवेत्।
वेश्यासमाजः कर्तव्यः पूजनं तु विशेषतः ॥ ६६ ॥

सात प्रकार की वेश्या का निरूपण—१. राजवेश्या, २. नृत्यवेश्या, ३. तीर्थवेश्या, ४. गुप्तवेश्या, ५. देववेश्या, ६. ब्रह्मवेश्या, इसके अतिरिक्त सप्तमी ७. ग्रामवेश्या बतलाई गई हैं। (पूजा-अर्चन के लिए) वेश्याओं का समाज बनाना चाहिये और उनका विशेष रूप से पूजन करना चाहिये ।। ६५-६६ ।।

दानं शय्या भूषणानि तासां दद्याद् दिने दिने ।
सर्वदा नृत्यगानस्य कालीं तारां प्रपूजयन् ।। ६७ ।।

उन्हें दान, शय्या एवं भूषण प्रतिदिन देवे । साधक नित्य नृत्य और गान करते हुए काली और तारा का पूजन करे ।। ६७ ।।

शक्तियोगस्य काठिन्यकथनम्

ईदृग्विधं महाभक्तं कदा पश्यामि पार्वति ।
शक्तियोगस्तु कठिनो दिव्ययोगो यथेच्छया ।। ६८ ।।

शक्तियोग का कठिनता का विवेचन—शिव जी कहते हैं—हे पार्वति ! मैं इस प्रकार के भक्त का कब दर्शन प्राप्त करूँगा क्योंकि शक्तियोग कठिन है और दिव्ययोग तो इच्छा पर निर्भर है ।। ६८ ।।

जननी तस्य वै धन्या पिता तस्य महेश्वरः ।

साधकस्य शक्तिस्वभावकथनम्

दाता कालीसमो लोके वेदे तारासमो भवेत् ।। ६९ ।।

साधक की शक्ति का स्वभाव—धन्य है उसकी माता और उसके पिता साक्षात् महेश्वर हैं, वह लोक में **काली** के समान दाता है और वेद में **तारा** के समान है ।। ६९ ।।

राज्ये श्रीसुन्दरीतुल्योऽनुग्रहे छिन्नमस्तका ।
विग्रहे बगलातुल्यो मातङ्गी तु वशीकृतौ ।। ७० ।।

राज्य में **श्रीसुन्दरी** के समान है और अनुग्रह करने में **छिन्नमस्तका** के समान है । विग्रह कराने में वह **बगला** के तुल्य है तथा वश करने में **मातङ्गी** के समान है ।। ७० ।।

सर्ववाञ्छामयी सिद्धिस्तस्य हस्तगता सदा ।
भुवनासदृशः शान्तौ क्रोधे धूमावतीसमः ।। ७१ ।।

उसके हाथ में सदा सर्ववाञ्छामयी शक्ति विद्यमान रहती है । शान्ति में वह **भुवना** के सदृश तथा क्रोध में **धूमावती** के समान है ।। ७१ ।।

क्रीडायां कालिकातुल्यो वाञ्छायां सुमुखीसमः ।

दातृत्वे कमला साक्षात् सत्ये श्रीकालिका यथा ॥ ७२ ॥

क्रीडा में **कालिका** के समान, वाञ्छा में **सुमुखी** के समान है । दान में वह साक्षात् **कमला** है और सत्य व्यवहार में वह **श्रीकलिका** के समान है ॥ ७२ ॥

ज्ञाने परशिवः प्रोक्तो ब्रह्माण्डनिर्मितौ शिवे ।
राजराजेश्वरीतुल्यः कर्षणे पायसप्रिया ॥ ७३ ॥

वह ज्ञान में पर शिव कहा गया है और ब्रह्माण्ड निर्माण में **राजराजेश्वरी** के समान होता है । आकर्षण में पायसप्रिया माता कहा गया है ॥ ७३ ॥

यथा प्रोक्ता तु त्रैलोक्ये महापद्मावती यथा ।
ईदृशः साधको देवि शक्तिज्ञानात् क्षणाद् भवेत् ॥ ७४ ॥

वह साधक त्रैकालिक ज्ञान में **महापद्मावती** के समान होता है । हे देवि ! शक्ति का ज्ञान हो जाने पर साधक क्षणमात्र में ऐसा सिद्ध हो जाता है ॥ ७४ ॥

अहो शक्तिस्वरूपस्य ज्ञाता कोऽस्ति महीतले ।
तत्रापि वेश्यालापी तु साक्षात् तारासमः कलौ ॥ ७५ ॥

आश्चर्य है, क्या शक्ति स्वरूप का ज्ञाता इस पृथ्वीमण्डल में कोई है और उसमें भी इस कलियुग में वेश्यालापी साक्षात् तारा के समान कहा गया है ॥ ८५ ॥

मुख्यः कुण्डलिनीशस्तु योगरूपो निरञ्जनः ।
ब्रह्मानन्दो महेशानि कला सप्तदशी तु सा ॥ ७६ ॥

कुण्डलिनीश साधक सर्वश्रेष्ठ है । यह योगरूप और निरञ्जन स्वरूप होता है । हे महेशानि ! वह ब्रह्मानन्द का स्वरूप है क्योंकि वह कुण्डलिनी स्वयं सत्रहवीं कला बतलाई गई हैं ॥ ७६ ॥

शक्तियोगकथनम्

तन्मार्गशक्तिभोगार्थं शक्तियोगः प्रकीर्तितः ।
शक्तियोगाकर्षणार्थं तासां वश्यार्थमेव च ॥ ७७ ॥

दिव्यपीठकथनम्

वेश्यापीठं दिव्यपीठं मया निगदितं शिवे ।
वेश्यापीठं द्रव्यसाध्यं द्रव्यं विभुवरस्य च ॥ ७८ ॥
विभुत्वं नरनाथत्वं महाराज्यं भवेच्छिवे ।
महाराजो नरो भूयान्निःस्पृहो धार्मिकः कृती ॥ ७९ ॥

कुमारीपूजनस्य माहात्म्यकथनम्

तत्पीठं तु महेशानि कुमारीपूजनेन तु ।

कुमारी सकला रामा रम्या रमणसुन्दरी॥ ८० ॥

शक्तियोग, दिव्यपीठ एवं कुमारी पूजन का माहात्म्य निरूपण—उसके मार्ग में रहने वाली शक्ति के भोग के लिये यह शक्तियोग कहा गया है, शक्तियोग के आकर्षण के लिये और उन शक्तियों को अपने वश में करने के लिये, हे शिवे ! वेश्यापीठ को ही (तन्त्रशास्त्र में) दिव्यपीठ कहा गया है । किन्तु वेश्यापीठ द्रव्य साध्य है और द्रव्य धनवानों के पास में होता है और वह विभुत्व राजा के पास में है क्योंकि उसके पास महान् राज्य है । वह महाराज पुरुष नि:स्पृह एवं धार्मिक तथा कृतज्ञ होता है । अत: हे महेशानि ! साधारण साधक को कुमारी पूजन से वह वेश्यापीठ उपलब्ध होता है । कुमारी सम्पूर्ण सुखों की खान है, वह रम्या है तथा रमणसुन्दरी कही गई है ॥ ७७-८० ॥

कुमारीदर्शनेनैव ब्रह्माण्डं पूजितं भवेत्।
कुमारीपूजनफलं महाराज्यं च वर्षत:॥ ८१ ॥

ऐसी कुमारी के दर्शन मात्र से समस्त ब्रह्माण्ड पूजित हो जाता है और कुमारी पूजन का फल महाराज्य है जो वर्ष भर तक कुमारी पूजन से प्राप्त होता है ॥ ८१ ॥

महाराज्यफलकथनम्

महाराज्यफलं देवि लक्ष्मीत्रितयवान् सुखी।
शक्रकर्ता भक्तभक्त: सर्वदा द्विजपूजक:॥ ८२ ॥
गुरुभक्तो विनीतश्च धीरोदात्तो महाशय:।
ईदृग्विधो महाराजो वेश्यामण्डलवान् भवेत्॥ ८३ ॥

महाराज्य का फल—हे देवि ! उस महाराज्य के फल स्वरूप वह तीन प्रकार की लक्ष्मी से पूर्णता को प्राप्त करता है तथा सुखी होता है । वह इन्द्र को भी इन्द्र बनाने वाला हो जाता है । शिव का भक्त सर्वदा द्विज-पूजक, गुरु-भक्त, विनीत एवं धीरोदात्त तथा महाशय होता है जो इस प्रकार का महाराज होता है वही वेश्यामण्डल का मालिक होता है ॥ ८२-८३ ॥

वेश्यातोषणफलकथनम्

वेश्यातोषणपुण्येन शक्तिलाभी नरो भवेत्।
दशाष्टशक्तय: प्रोक्ता विद्यामातृक्रमेण च॥ ८४ ॥

वेश्या को सन्तुष्ट करने का फल—मनुष्य वेश्या के सन्तुष्ट करने के फलस्वरूप शक्ति का लाभ प्राप्त करता है और विद्या मातृका के क्रम से अट्ठारह शक्तियों की सामर्थ्य वाला कहा जाता है ॥ ८४ ॥

अष्टाष्टककथनम्

दशविद्या मातृकाऽष्टौ तद्रूपसामरस्यवान् ।
अष्टाष्टकमिदं प्रोक्तमिदमेव त्रिधेरितम् ॥ ८५ ॥

अष्टाष्टक निरूपण—दश विद्या और आठ मातृकायें उन १८ शक्तियों के रूपों की सामरस्य हैं । इन्हें अष्टाष्टक कहा जाता है । इन्हें ही तीन प्रकार का कहा गया है ॥ ८५ ॥

ब्रह्मरूपधरे देवि कृपयाहर विग्रहम् ।
इत्यादि पूजने नाम यत्प्रोक्तं परमेश्वरि ॥ ८६ ॥
अष्टाष्टकप्रभेदेन गदितं नीलशारदे ।
तत्र तदुक्तिमाचर्य सर्वसिद्धिश्वरो भवेत्॥ ८७ ॥

हे ब्रह्मरूपधरे देवि ! कृपया अपना विग्रह धारण कीजिए । यहाँ पूजन में जो नाम है उसे कहे । हे नीलशारदे अष्टाष्टक की उक्ति का उच्चारण कर साधक सभी सिद्धियों का ईश्वर हो जाता है ।

अष्टशक्तौ महेशानि या शक्तिः परिनिष्ठिता ।
सा सिद्धिस्तस्य वै भूयान्नात्र कार्या विचारणा ॥ ८८ ॥

हे महेशानि ! अष्टशक्ति में जो शक्ति परिनिष्ठित रूप से वहाँ रहती है वही सिद्धि शक्ति उस अर्चना करने वाले को प्राप्त हो जाती है इसमें विचार की आवश्यकता नहीं ॥ ८८ ॥

उत्तरोत्तरभावस्य सिद्ध्यर्थं परमेश्वरि ।
रूपगन्धप्रभेदेन दशविद्याः प्रकीर्तिताः ॥ ८९ ॥

हे परमेश्वरि ! रूप एवं गन्ध के भेद से उत्तरोत्तर भाव की सिद्धि के लिये दश विद्यायें कही गई हैं ॥ ८९ ॥

महाशक्तिनामकरणकथनम्

मातापितृकृतं नाम त्यक्त्वा नाम यथार्थतः ।
नाम दद्यान्महेशानि तासु देवत्वभावना ॥ ९० ॥

महाशक्ति का नामकरण—साधक उस महाशक्ति का माता पिता द्वारा किया गया नाम त्यागकर उसका नामकरण यथार्थरूप से इस प्रकार देवे जिसमें देवत्व की भावना हो ॥ ९० ॥

तत्र विकारयुक्तश्चेत् तत्क्षणान्नश्यति ध्रुवम् ।
अथाविकारसिद्ध्यर्थमक्षरन्त्यां प्रपूजयेत् ॥ ९१ ॥

यदि उस समय उसे कामादि विकार हुए तो वह तत्क्षण निश्चय रूप से नष्ट हो जाता है अतः अविकार प्राप्ति के लिये क्षरण रहित (रजःस्वला रहित) कुमारी का ही पूजन करे ॥ ९१ ॥

अविकारसिद्ध्यर्थं कुमारीपूजनम्

अक्षरन्ती कुमारी च क्षरन्ती तरुणी मता ।
कामादिविषयैर्व्याप्ते मायामोहप्रवेष्टिते ॥ ९२ ॥
इन्द्रियाणां निग्रहो हि कलौ कस्य भविष्यति ।
अविकारप्रसिद्ध्यर्थं कुमारीं पूजयेच्छिवे ॥ ९३ ॥

अविकार की सिद्धि हेतु कुमारीपूजन—जिसका क्षरण (रजस्राव) न हुआ हो वह कुमारी है और जिसका क्षरण हुआ हो उसे 'तरुणी' कहा जाता है । जब मनुष्यों में कामादि विषय व्याप्त हो जाता है और शरीर में माया मोह का प्रवेश हो जाता है तो इस मोह का निग्रह करने में त्रिलोक में कौन समर्थ है । साधक देवी की कृपा से ही अपने इन्द्रियों को वश में रख सकता है । हे शिवे ! अपने मन में किसी प्रकार का विकार न हो, इसलिये 'कुमारी' का ही पूजन करना चाहिये ॥ ९२-९३ ॥

वर्षक्रमेण कुमारीरूपकथनम्

उत्तरोत्तरवर्षाणां क्रमेण नवचण्डिकाम् ।
मातृकाष्टक्रमेणैव दशविद्याक्रमेण च ॥ ९४ ॥
अष्टकन्याजातिमार्गात् कुलाकुलक्रमेण च ।
पञ्चचक्रक्रमेणैव पञ्चाशत्पीठयोगतः ॥ ९५ ॥
नाम दद्यान्महेशानि तद्भावेन प्रपूजयेत् ।
अनन्यभावनाशक्तः पूजयेद्धि कुमारिकाम् ॥ ९६ ॥

वर्षक्रम से कुमारीरूप कथन—उत्तरोत्तर वर्षों के क्रम से क्रमशः नव चण्डिका होती है । मातृका क्रम से क्रमशः आठ मातृका होती है । विद्या के क्रम से क्रमशः दश विद्या होती हैं । जाति के क्रम से क्रमशः आठ जाति होती हैं । कुलाकुलक्रम से भी क्रमशः उतनी ही (आठ) कन्या होती हैं । चक्र क्रम से क्रमशः पाँच कन्या होती हैं । पीठ योग क्रम से पचास कन्याओं का पूजन करे । उनका पृथक् रूप से, हे महेशानि ! नामकरण करे । यदि इतना न कर सके तो उनका पूजन न करे । कुमारियों का पूजन अनन्य भावना से करे ॥ ९४-९६ ॥

कुमारीपूजनादेव त्रैलोक्यं करमध्यगम् ।
पूजनेन कुमारीणां तत्त्वज्ञानं प्रजायते ॥ ९७ ॥

कुमारी के पूजन से सारा त्रैलोक्य हस्तगत हो जाता है और कुमारी पूजन से तत्त्वज्ञान उत्पन्न होता है ॥ ९७ ॥

इन्द्रियनिग्रहस्यावश्यकताकथनम्

तत्त्वज्ञाने समुत्पन्ने वेश्यापूजनवान् विभुः ।
क्रीडालोला विनोदार्ता वृद्धानामपि मोहिनी ॥ ९८ ॥
ईदृग्विधा या हि बाला ह्युत्पत्तिर्योनिलिङ्गवत् ।
ईदृग्विधो निग्रही यः स सुरासुरपूजितः ॥ ९९ ॥

इन्द्रियनिग्रह की आवश्यकता—तत्त्वज्ञान हो जाने पर साधक (दीक्षित) वेश्या के पूजन का अधिकारी हो जाता है और क्रीडा में कुशल तथा हँसी विनोद में निपुण वृद्धों को भी मोहित करने वाली जो बाला कही जाती है जिसकी उत्पत्ति में योनि का चिह्न है । जो इस प्रकार 'बाला' पर अपना (इन्द्रिय) निग्रह कर सकता है, वह साधक देवता एवं असुरों से पूजित होता है ॥ ९८-९९ ॥

सिद्धिसोपानकथनम्

यासां दर्शनमात्रेण मुनयो मोहसङ्गताः ।
तासु तेषु (तासु) विरक्तो यः स च शक्तिप्रपूजकः ॥ १०० ॥

सिद्धि सोपान निरूपण—जिन बालाओं के दर्शन मात्र से मुनिगण भी मोहित हो जाते हैं उन-उन बालाओं में जो साधक विरक्त है वही समर्थ एवं सच्चा शक्ति पूजक है ॥ १०० ॥

अत्र चेत् क्षरणं नास्ति क्षरणं नास्ति भूतले ।
ततः शक्त्याः सदा पूजा कर्तव्या परमेश्वरि ॥ १०१ ॥

यदि इस अवस्था में पुरुष का क्षरण नहीं हुआ तो उसका क्षरण पृथ्वी में कदापि सम्भव नहीं है, इसलिये, हे परमेश्वरि ! शक्ति की सदैव पूजा करनी चाहिये ॥ १०१ ॥

नामरूपादि गन्धादि यदि स्यात् परमेश्वरि ।
सिद्धविद्या तु सा प्रोक्ता नात्र कार्या विचारणा ॥ १०२ ॥

हे परमेश्वरि ! यदि उसमें नाम, रूपादि एवं गन्धादि की उत्पत्ति है, तो हे परमेश्वरि ! वह सिद्धविद्या ही है इसमें विचार की आवश्यकता नहीं है ॥ १०२ ॥

सिद्धिसोपानमेतद्धि गदितं नीलशारदे ।
शक्त्या व्याप्तमिदं सर्वं जगदेतच्चराचरम् ॥ १०३ ॥

नीलशारदा नामक ग्रन्थ में यह सिद्धि का सोपान कहा गया है । वस्तुतः यह सारा चराचर जगत् शक्ति से व्याप्त है ॥ १०३ ॥

तया यदुक्तं देवेशि तदेव कारयेत् प्रिये ।
योगं कुर्विति चेदुक्तं तदेव च समाचरेत्॥ १०४ ॥

हे देवेशि ! हे प्रिये ! वह (शक्ति) जो कुछ भी कहे उसकी उक्ति करनी चाहिये । यदि उसने कहा कि योग करो तो वही करे ॥ १०४ ॥

५. गाणपत्य सम्प्रदाय में तन्त्रों की संख्या—हे महेशानि ! गाणपत्य तन्त्र में ५० तन्त्र हैं । २५ उपतन्त्र हैं, पुराण और अ़मृत और सागर दो-दो तथा तीन हैं, तीन पाँच तथा ९ दर्पण, अमृत एवं कल्प हैं । तीन कक्षपुटी, विमर्षिणी २४ तथा उड्डाल एवं उड्डीश दो-दो हैं ॥ ११७-११८ ॥

चूडाचिन्तामणीनां च त्रितयं च गणाः स्मृताः ।
एकं तु डामरं प्रोक्तं यामलं चन्द्रसंख्यकम् ॥ ११९ ॥
पञ्चरात्राष्टकं देवि देशकालेषु सर्वतः ।

चूडामणि (तन्त्र) और चिन्तामणि (तन्त्र) के तीन-तीन समूह कहे गये हैं। गाणपत्य सम्प्रदाय में डामर एक है और यामल भी एक ही है। हे देवि! आठ पञ्चरात्र ग्रन्थ सभी देश और कालों में प्राप्य हैं ॥ ११९ ॥

इति संक्षेपतः प्रोक्तं रहस्यातिरहस्यकम् ॥ १२० ॥
गोपनीयं महेशानि रहस्यातिरहस्यकम् ।
गोपनात् सिद्धिदं भूयात् प्रकाशात् सिद्धिहानिकृत् ॥ १२१ ॥

इस प्रकार तन्त्रों की संख्या के रहस्य से भी अति रहस्य संक्षेप में कहा गया है। इसको गुप्त रखने से सिद्धि प्राप्त होती है और प्रकाशित करने से यह सिद्धि में हानि पहुँचाता है ॥ १२०-१२१ ॥

अहो पुण्यवतां मध्ये एतज्ज्ञानपरायणः ।
एतज्ज्ञानी महेशानि शिव एव न संशयः ॥ १२२ ॥
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ।

इति श्रीमदक्षोभ्यतारासंवादे श्रीशक्तिसङ्गममहातन्त्रराजे तारासूक्ते कालपर्याय-जयन्तीनिर्णयो नाम षष्ठः पटलः ॥ ६ ॥

* * *

आश्चर्य है कि पुण्यावानों के मध्य में इस ज्ञान का जानकार कोई ही होगा। हे महेशानि! इसके ज्ञानी केवल एकमात्र शिव ही है, इसमें संशय नहीं। यहाँ तक संक्षेप में कहा गया है और क्या सुनना चाहती है? ॥ १२२ ॥

॥ इस प्रकार श्रीशक्तिसंगममहातन्त्रराज के उत्तरभाग में छिन्नमस्ता चतुर्थ खण्ड के श्रीमदक्षोभ्यमहोग्रतारासंवाद के तारासूक्त में महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय कृत 'कालपर्यायजयन्तीनिर्णय' नामक षष्ठ पटल की सुधा नामक हिन्दी व्याख्या पूर्ण हुई ॥ ६ ॥

* * *

सप्तमः पटलः

पर्यायाम्नायादिनिर्णयकथनम्

श्रीदेव्युवाच–

देवेशि श्रोतुमिच्छामि रहस्यातिरहस्यकम् ।

* सुधा *

श्रीदेवी ने कहा—हे देवेश ! रहस्य से भी अतिरहस्य जानना चाहती हूँ ।

श्रीशिव उवाच–

रहस्यमपि ते देवि कथ्यते श्रृणु साम्प्रतम् ॥ १ ॥

श्रीशिव ने कहा—हे देवि ! यद्यपि यह रहस्य है, फिर भी मैं इस समय आपसे कह रहा हूँ, सुनिए ॥ १ ॥

बटुकमते षडाम्नायदेवताविधानम्

१. पूर्वाम्नायदेवताकथनम्

गायत्र्यैन्द्री सौरविद्या ब्रह्मविद्या तुरीयका ।
चक्षुष्मती महेशानि गन्धर्वेशी ततः परम् ॥ २ ॥
पथिषद्रुद्रविद्या च जलापच्छमनी तथा ।
नामत्रयी महाविद्या महागणपतिस्तथा ॥ ३ ॥
अर्धनारीश्वरी विद्या तथा मृत्युञ्जयः शिवे ।
श्रुतिधरी मातृका च तथा सम्पत्सरस्वती ॥ ४ ॥
चण्डयोगेश्वरी विद्या शाम्भवी श्रीपरापरा ।
बालान्नपूर्णा देवेशि वाजिवाहा गुरोः पदौ ॥ ५ ॥
कामराजेश्वरी विद्या तथा त्रिपुरभैरवी ।
चैतन्यभैरवी रुद्रशक्तिः कामेश्वरी तथा ॥ ६ ॥
महात्रिपुरभैरवी च अघोरभैरवी तथा ।
त्रिपुरकृन्तनभैरवी च षट्कूटा रिपुभावतः ॥ ७ ॥

निकृन्तनभैरवी च भुवनाभैरवी तथा ।
अन्नपूर्णाभैरवी च त्वरिता कुक्कुटा शिवा ॥ ८ ॥
त्रिकण्टकी भोगवती पूर्वाम्नायप्रकीर्तिताः ।

बटुक मतानुसार पूर्वाम्नाय एवं दक्षिणाम्नाय के देवता—१. गायत्री, २. ऐन्द्री, ३. सौरविद्या, ४. ब्रह्मविद्या, ५. चक्षुष्मती, ६. गन्धर्वेशी, ७. पाथिषद्, ८. रुद्रविद्या, ९. जलापच्छमनी, १०. नामत्रयी, ११. महाविद्या, १२. महागणपति, १३. अर्धनारीश्वरीविद्या, १४. मृत्युञ्जय, १५. श्रुतिधरी, १६. मातृका, १७. संपत् सरस्वती, १८. चण्डयोगेश्वरी विद्या, १९. शाम्भवी, २०. श्रीपरा, २१. अपरा, २२. बाला, २३. अन्नपूर्णा, २४. वाजिवाहा, २५. गुरु के दोनों चरण कमल, २६. कामराजेश्वरी विद्या, २७. त्रिपुरभैरवी, २८. चैतन्यभैरवी, २९. रुद्रशक्ति, ३०. कामेश्वरी, ३१. महत्रिपुरभैरवी, ३२. अघोरभैरवी, ३३. त्रिपुरकृन्तनभैरवी, ३४. षट्कूटा, ३५. रिपुभावा, ३६. निकृन्तनभैरवी, ३७. भुवनाभैरवी, ३८. अन्नपूर्णाभैरवी, ३९. त्वरिता, ४०. कुक्कुटा, ४१. शिवा, ४२. त्रिकण्टकी और ४३. भोगवती—ये पूर्वाम्नाय की देवता कही गई हैं ॥ २-९ ॥

२. दक्षिणाम्नायदेवताकथनम्

नित्यक्लिन्ना च त्वरिता माया मायावती रमा॥ ९ ॥
धनदा शबरी दुर्गा रेणुका कुलरञ्जिनी।
प्रोक्तोऽयं दक्षिणाम्नायः पश्चिमे शृणु सत्वरम्॥ १० ॥

१. नित्यक्लिन्ना, २. त्वरिता, ३. माया, ४. मायावती, ५. रमा, ६. धनदा, ७. शबरी, ८. दुर्गा, ९. रेणुका और १०. कुलरञ्जिनी—इस प्रकार यहाँ दक्षिणाम्नाय देवताक्रम कहा गया है । अब शीघ्रतिशीघ्र पश्चिमाम्नाय सुनिए ॥ ९-१० ॥

३. पश्चिमाम्नायदेवताकथनम्

नवकोटिकुब्जिका च तथा सङ्कर्षिणी शिवे ।
क्रियासङ्कर्षिणी चैव कालसङ्कर्षिणी तथा॥ ११ ॥
महाविद्या शूलिनी च परिघास्त्रा च माधवी ।
पश्चिमाम्नाय आदिष्टस्तूत्तरं शृणु सादरम्॥ १२ ॥

पश्चिमाम्नाय के देवता—१. नवकोटि कुब्जिका, २. सङ्कर्षिणी, ३. क्रियासङ्कर्षिणी, ४. कालसङ्कर्षिणी, ५. महाविद्या, ६. शूलिनी, ७. परिघास्त्रा और ८. माधवी—ये पश्चिमाम्नाय के देवता कहे गये हैं । अब उत्तराम्नाय सुनिए ।

४. उत्तराम्नायदेवताकथनम्

चण्डयोगेश्वरी विद्या चामुण्डा ह्यणिमाष्टकम् ।

रत्नविद्या सिद्धविद्या उत्तराम्नाय ईरितः ॥ १३ ॥

उत्तराम्नाय के देवता—१. चण्डयोगेश्वरी विद्या, २. चामुण्डा, ३. आठ अणिमा, ४. रत्नविद्या और ५. सिद्धविद्या यहाँ तक उत्तराम्नाय कहा गया है ।

५. ऊर्ध्वाम्नायदेवताकथनम्

साम्राज्यसुन्दरी विद्या राजराजेश्वरी तथा ।
महासाम्राज्यविद्या च ऊर्ध्वाम्नायः प्रकीर्त्तितः ॥ १४ ॥

ऊर्ध्वाम्नाय के देवता—१. साम्राज्यसुन्दरी विद्या, २. राजराजेश्वरी और ३. महासाम्राज्यविद्या यहाँ तक ऊर्ध्वाम्नाय कहा गया है ॥ १४ ॥

६. पातालाम्नायदेवताकथनम्

यक्षिणी किन्नरी सिद्धी पूतना कवचा तथा ।
कूष्माण्डिनी महादेवि पातालाम्नाय ईरितः ॥ १५ ॥

पातालाम्नाय के देवता—१. यक्षिणी, २. किन्नरी, ३. सिद्धि, ४. पूतना, ५. कवचा और ६. कूष्माण्डिनी—हे महादेवि ! इतने पातालाम्नाय के देवता कहे गए हैं ॥ १५ ॥

महामूर्तिमते षडाम्नायदेवताविधानम्

बटुकस्य मतं प्रोक्तं महामूर्तिमतं शृणु ।

१. महामूर्तिमते पूर्वाम्नायदेवताकथनम्

लोपागस्त्यमनुर्देवि द्वितीयोऽपि मनुः शिवे ॥ १६ ॥

१. महामूर्ति के मतानुसार पूर्वाम्नाय के देवता—यहाँ तक बटुक का मत कहा गया अब महामूर्त्ति का मत सुनिए । १. लोपामुद्रा और २. अगस्त्य के मन्त्र महामूर्तिमत का पूर्वाम्नाय है । अब हे शिवे ! द्वितीय के मन्त्र के विषय में सुनिए ।

द्वितीयागस्त्यविद्या च चन्द्रश्चोत्तरदिक्पतिः ।
तृतीयागस्त्यविद्या च नन्दीन्द्रसूर्यशङ्कराः ॥ १७ ॥
विष्णुदुर्वासभेदेन पूर्वाम्नायः प्रकीर्तितः ।

द्वितीय अगस्त्य विद्या मन्त्र है और चन्द्र उत्तर के दिक्पति हैं, तृतीय अगस्त्य विद्या और नन्दी, इन्द्र, सूर्य और शङ्कर, विष्णु तथा दुर्वासा के भेद से युक्त पूर्वाम्नाय कहा गया है ॥ १७-१८ ॥

२. महामूर्तिमते दक्षिणाम्नायदेवताकथनम्

वाग्वादिनी च चाण्डाली सुमुखी च मतङ्गिनी ॥ १८ ॥
माहेश्वरीति देवेशि दक्षिणाम्नायः ईरितः ।

२. महामूर्ति के मतानुसार दक्षिणाम्नाय के देवता—वाग्वादिनी, चाण्डाली, सुमुखी, मतङ्गिनी, माहेश्वरी, हे देवेशि ! इतने दक्षिणाम्नाय कहे गये हैं ॥ १८-१९॥

३. महामूर्तिमते पश्चिमाम्नायदेवताकथनम्

राजमातङ्गिनी विद्या लघुवाराहिता तथा ॥ १९ ॥
श्रीतिरस्कारिणी स्वप्नवाराही पादुकापि च ।
वाराहीपादुका चैव जम्बुकी किष्किका शुका ॥ २० ॥
वागीशी शुकतुण्डा च मोहिनी च किरातिनी ।
क्षेमङ्करीति देवेशि पश्चिमाम्नायदेवताः ॥ २१ ॥

३. महामूर्ति मतानुसार पश्चिमाम्नाय के देवता—हे देवेशि ! राजमातङ्गिनी विद्या, लघुवाराही, श्रीतिरस्कारिणी, स्वप्नवाराही, पादुकावाराही, पादुकाजम्बुकी, किष्किका, शुका, वागीशी, शुक्रतुण्डा, मोहिनी, किरातिनी एवं क्षेमङ्करी—ये पश्चिमाम्नाय के देवता कहे गये हैं ॥ १९-२१ ॥

४. महामूर्तिमते उत्तराम्नायदेवताकथनम्

श्रीमूर्तिपादुका चैव वार्ताली श्रीमहागुरोः ।
पादुका परमेशानि श्रीमहातिमिरावती ॥ २२ ॥
कालमाया वासनाख्या चामुण्डा भयहारिणी ।
उत्तराम्नाय आदिष्टस्तूर्ध्वं शृणु महेश्वरि ॥ २३ ॥

४. महामूर्ति मतानुसार उत्तराम्नाय के देवता—हे परमेशानि ! श्रीमूर्त्ति पादुका, वार्त्ताली, श्रीमहागुरुपादुका, श्रीमहातिमिरावती, कालमाया, वाग्सनाख्या, चामुण्डा एवं भयहारिणी—ये उत्तराम्नाय के देवता कहे गये हैं । हे महेश्वरि ! अब ऊर्ध्व आम्नाय के देवता के विषय में सुनिए ॥ २२-२३ ॥

५. महामूर्तिमते ऊर्ध्वाम्नायदेवताकथनम्

षोडशी श्रीपरा विद्या तथा चरणरूपिणी ।
षट्शाम्भवं महेशानि ऊर्ध्वाम्नायः प्रकीर्तितः॥ २४ ॥

५. महामूर्ति मतानुसार ऊर्ध्वाम्नाय के देवता—हे महेशानि ! षोडशी, श्रीपरा, चरण रूपिणी विद्या और षट्शाम्भव—इतने ऊर्ध्वाम्नाय के देवता कहे गये हैं ॥ २४ ॥

६. पातालाम्नायदेवताकथनम्

चेटकादि महेशानि पातालाम्नायगोचरम् ।

अयं तु कालपर्यायो देशपर्याय एव च ॥ २५ ॥
कादिहादिमते साम्यं पर्यायद्वयगोचरम् ।
इति संक्षेपतः प्रोक्तमाम्नायाख्यं शृणु प्रिये ॥ २६ ॥

६. महामूर्ति मतानुसार पातालाम्नाय के देवता—हे महेशानि ! चेटकादि प्रयोग पातालाम्नाय में देखे जाते हैं । यह काल पर्याय तथा देश पर्याय दोनों ही कहा गया है । ये दोनों पर्याय कादि के मत में तथा हादि के मत में दोनों में बराबर देखे जाते हैं । हे प्रिये ! यहाँ तक संक्षेप में कालपर्याय कहा गया है । अब आम्नाय के विषय में सुनिए ॥ २५-२६ ॥

महामूर्तिमते आम्नायस्य तन्त्रसंख्याकथनम्

बाला पञ्चदशी चैव षोडशी पूर्वगोचराः ।

१. पूर्वाम्नाये तन्त्रसंख्याकथनम्

तन्त्राणां तु चतुष्षष्टिः पूर्वाम्नायप्रगोचरम् ॥ २७ ॥

१. महामूर्ति मतानुसार पूर्वाम्नाय के तन्त्र एवं देवता—बाला, पञ्चदशी और षोडशी ये पूर्व आम्नाय के देवता हैं । ६४ संख्यक तन्त्र पूर्वाम्नाय में देखे जाते हैं ॥ २७ ॥

सप्तत्युत्तरतो देवि षट्शतं चोपतन्त्रकम् ।
पराश्रीतत्परा चैव प्रासादपरमाऽथवा ॥ २८ ॥
पराप्रासादविद्या च बिन्दुयुक्ता ससर्गजा ।
तद्द्वयान्ता दक्षिणे स्यात् तन्त्राणि शृणु पार्वति ॥ २९ ॥

६७० उपतन्त्र हैं । पराश्रीतत्पर, प्रासादपरमा, पराप्रासादविद्या एएवं बिन्दुयुक्ता ससर्गज ये दोनों ही तन्त्र दक्षिण आम्नाय में गोचर हैं । अब हे पार्वति ! तन्त्रों के विषय में सुनिए ॥ २८-२९ ॥

२. दक्षिणाम्नाये तन्त्रसंख्याकथनम्

चतुःशतं च तन्त्राणि त्रिशतं पञ्चसप्ततिः ।
उपतन्त्राणि देवेशि यामलाद्यं च कालवत् ॥ ३० ॥

२. दक्षिणाम्नाय में तन्त्रों की संख्या—चार सौ तन्त्र हैं तथा तीन सौ पचहत्तर उपतन्त्र हैं और यामलादि को काल के समान समझना चाहिये ॥ ३० ॥

महानिर्वाणचरणौ तथा शाम्भवरूपिणौ ।
षट्शाम्भवं नवात्मेशो यथायोगेन योज्यताम् ॥ ३१ ॥
षण्णवत्युपतन्त्राणि तन्त्राणां भवति प्रिये ।

तन्त्राणि परमेशानि पश्चिमाम्नायगोचराः ॥ ३२ ॥

३. दो महानिर्वाण एवं चरण है, दो शाम्भव रूप हैं, षट् शाम्भव और नव आत्मेश इनको यथायोग एक में मिलाने पर १९ तन्त्र हैं एवं ९६ उपतन्त्र कहे गए हैं । हे प्रिये ! सभी तन्त्र की गणना में आते हैं । हे परमेशानि ! ये सभी तन्त्र पश्चिमाम्नाय में देखे जाते हैं ॥ ३१-३२ ॥

उत्तराम्नायो देवेशि मेधा दीक्षेश्वरी मता ।
पञ्चविंशति तन्त्राणि तथा नवशतानि च ॥ ३३ ॥
त्रिशतं च चतुष्षष्टिरुपतन्त्राणि पार्वति ।
साम्राण्मेधा महेशानि ऊर्ध्वाम्नायप्रगोचरा ॥ ३४ ॥

४. हे देवेशि ! उत्तराम्नाय मेधा दीक्षेश्वरी मत वाला है । इसके ९२५ तन्त्र हैं और ३६४ उपतन्त्र हैं । ५. साम्राट् मेधा वाला ऊर्ध्वाम्नाय कहा गया है ।

चतुःषष्टिस्तु तन्त्राणि पञ्चाशीत्युपतन्त्रकम् ।
महेन्द्रजालविद्या च परकाया च खेचरी ॥ ३५ ॥
पातालाम्नायविद्या च कीर्तिता परमेश्वरि ।
शतं पञ्च च तन्त्राणि नेत्रसप्तशती शिवे ॥ ३६ ॥
उपतन्त्राणि देवेशि पातालाम्नायगोचरम् ।
रहस्यातिरहस्यं च प्रोक्तमेतन्मया तव ॥ ३७ ॥

इसके चौंसठ तन्त्र हैं और पचासी उपतन्त्र हैं । ६. महेन्द्र जालविद्या तथा परकाया प्रवेश और खेचरी विद्या से सम्बन्धित, हे परमेश्वरि ! पातालाम्नाय विद्या कही जाती है । एक सौ पाँच तन्त्र और चौदह सौ की संख्या में उपतन्त्र पातालाम्नाय में गोचर हैं । हे शिवे ! यहाँ तक रहस्य से भी अतिरहस्य आम्नायों को कहा गया है ॥ ३५-३७ ॥

समयाम्नायमते षडाम्नायस्य तन्त्रसंख्याकथनम्

समयाम्नायनाम्ना तु विद्याम्नायः प्रकीर्तितः ।
श्रीविद्या भेदसहिता बाला च त्रिपुरा तथा ॥ ३८ ॥
भुवनेश्वर्यन्नपूर्णा च पूर्वाम्नायः प्रकीर्तितः ।
दशतन्त्राणि देवेशि उपतन्त्राणि पञ्च च ॥ ३९ ॥
बगला वशिनी देवि त्वरिता च कुलेश्वरी ।
महिषघ्नी महालक्ष्मीस्तन्त्राष्टसहिता शिवे ॥ ४० ॥
नवसंख्योपतन्त्राणि दक्षवक्त्रोद्गतानि च ।
महासरस्वती देवी तथा वाग्वादिनी शिवे ॥ ४१ ॥

प्रत्यङ्गिरा भवानी च पश्चिमाम्नायगोचराः ।
विंशत्तन्त्राणि देवेशि उपतन्त्राष्टकं शिवे ॥ ४२ ॥

विद्याम्नाय 'समयाम्नाय' नाम से कहा जाता है । १. भेदों के साथ श्रीविद्या और बाला, त्रिपुरा, भुवनेशी एवं अन्नपूर्णा ये देवता पूर्वाम्नाय में कहे गये हैं । हे देवेशि ! दश तन्त्र एवं पाँच उपतन्त्र पूर्वाम्नाय के हैं । २. बगला, वशिनी, त्वरिता, कुलेश्वरी, महिषघ्नी तथा महालक्ष्मी हे शिवे ! इतने ८ के सहित नव संख्या वाले उपतन्त्र ये दक्ष मुख से उत्पन्न हुए हैं । ३. महासरस्वती देवी, वाग्वादिनी एवं प्रत्यङ्गिरा और भवानी देवता हैं और ये २० तन्त्र एवं आठ उपतन्त्र भी पश्चिमाम्नाय में गोचर हैं ॥ ३७-४२ ॥

अथोत्तरं महावक्त्रं शृणु यत्नेन पार्वति ।
कालिका भेदसहिता तारा मातङ्गिनी तथा ॥ ४३ ॥
भैरवी छिन्नमस्ता च धूमावत्युत्तरेश्वरी ।
शततन्त्राणि देवेशि उपतन्त्राणि वै नव ॥ ४४ ॥
द्वाविंशत्यक्षरी भेदसहिता दक्षिणेऽपि च ।
पराप्रासादविद्या तु विंशत्तन्त्रसमन्विता ॥ ४५ ॥
उपतन्त्रत्रयं देवि पातालं शृणु पार्वति ।

६. पातालाम्नायकथनम्

नागशक्त्यादयो देवि पातालाम्नायगोचराः ॥ ४६ ॥

४. अब हे पार्वती ! यत्नपूर्वक उत्तराम्नाय के विषय में सुनिए । हे देवेशि ! भेदों के सहित कालिका, तारा, मातङ्गिनी, भैरवी, छिन्नमस्ता, धूमावती एवं उत्तरेश्वरी देवता हैं । उनके १०० तन्त्र हैं और ९ उपतन्त्र हैं । ५. भेद सहित ३२ अक्षरों वाली परा प्रासाद विद्या देवता हैं । उनके बीस तन्त्रों के साथ तीन उपतन्त्र हैं जो दक्षिणाम्नाय कहे जाते हैं । अब ६. पातालाम्नाय के विषय में सुनिए । हे देवि ! नागशक्त्यादि तन्त्रग्रन्थ पातालाम्नाय में देखे जाते हैं ॥ ४३-४६ ॥

भवतन्त्रसमायुक्तमुपतन्त्रद्वयं शिवे ।
विद्याम्नायो महेशानि संक्षेपेण प्रकाशितः ॥ ४७ ॥

हे शिवे ! भवतन्त्र से संयुक्त दो उपतन्त्र और विद्याम्नाय—ये यहाँ संक्षेप में विद्याम्नाय के तन्त्र प्रकाशित किए गए हैं ॥ ४७ ॥

शाक्तं पूर्वे महेशानि शततन्त्रसमन्वितम् ।
उपतन्त्राष्टकं देवि शैवं च दक्षिणे भवेत् ॥ ४८ ॥
पञ्चाशत्तन्त्रसंयुक्तमुपतन्त्राणि पञ्च च ।

वैष्णवं पश्चिमे प्रोक्तं तत्त्वतन्त्रसमन्वितम्॥ ४९ ॥

१. शततन्त्र समन्वित **शाक्त तन्त्र** पूर्वाम्नाय में है । २. हे देवि ! शैव सम्प्रदाय के ८ उपतन्त्र दक्षिणाम्नाय में हैं । ३. ५० तन्त्रों से समन्वित ५ उपतन्त्र तथा २४ **वैष्णव तन्त्र** पश्चिमाम्नाय के कहे गये हैं ॥ ४८-४९ ॥

उपतन्त्राणि तावन्ति दक्षिणाचारसंकुलम्।
उत्तरे गाणपं देवि तन्त्रसप्ततिसंयुतम्॥ ५० ॥

दक्षिणाचार से मिश्रित उपतन्त्र भी उतनी ही संख्या में है । ४. हे देवि ! ७० तन्त्रों से युक्त **गणप तन्त्र** उत्तराम्नाय में है ॥ ५० ॥

उपतन्त्रत्रयं चात्र शृणु सौरं महत्तरम् ।
सौरमूर्ध्वे महेशानि तन्त्रद्वादशसंयुतम् ॥ ५१ ॥

इसमें ३ उपतन्त्र भी मिले हुए हैं । ५. अब महान् **सौर तन्त्र** के विषय में सुनिए । हे महेशानि ! १२ तन्त्रों से युक्त सौर तन्त्र ऊर्ध्वाम्नाय में हैं ॥ ५१ ॥

दशोपतन्त्रसंयुक्तं शृणु बौद्धं महेश्वरि ।
शततन्त्रसमायुक्तमुपतन्त्रं त्रिषष्टि च ॥ ५२ ॥

हे महेशानि ! अब दश उपतन्त्र से संयुक्त **बौद्ध तन्त्रों** के विषय में सुनिए । बौद्ध तन्त्र १०० तन्त्रों से संयुक्त है और ६३ उसके उपतन्त्र हैं ॥ ५२ ॥

पाताले परमेशानि पञ्चायतनवद् भवेत् ।
य एव मुख्यो देवेशि तदाद्याम्नायसंहतिः ॥ ५३ ॥

हे परमेशानि ! पातालाम्नाय में पञ्चायतन के समान ही (देवता एवं तन्त्र) होते हैं । हे देवेशि ! इसमें जो मुख्य है वही आम्नायों का समुदाय है ॥ ५३ ॥

महानिष्कलदर्शनाम्नायकथनम्

प्रत्येकं तु षडाम्नाया दर्शनेष्वेव पार्वति ।
इति दर्शनपर्यायः शाक्ते वैदिकदर्शने ॥ ५४ ॥

महानिष्कल दर्शन नामक आम्नाय निरूपण—हे पार्वति ! दर्शन में प्रत्येक के छह आम्नाय कहे गये हैं । शक्ति एवं वैदिक दर्शन में मात्र यही दर्शन का पर्याय कहा गया ॥ ५४ ॥

योजने परमेशानि महानिष्कलदर्शनम् ।
आम्नायः कथिता देवि श्रीहादिमतगोचरः ॥ ५५ ॥

हे परमेशानि ! यदि इन्हें परस्पर मिला दिया जावे तो यह महानिष्कल दर्शन नामक आम्नाय कहा जाता है जो श्रीहादि मत में देखे जाते हैं ॥ ५५ ॥

कादिमते दर्शनस्याभिधानम्

नवभेदेन कथितः शृणु कादिमहत्तरम्।
श्रीशैवदर्शनं पूर्वे वैष्णवं दक्षिणे भवेत्॥ ५६ ॥
गाणपं पश्चिमे प्रोक्तं सौरमुत्तरगोचरम्।
ऊर्ध्वाम्नाये भवेच्छाक्तं तन्त्राणि देववद् भवेत्॥ ५७ ॥

अब नौ भेदों में कहे जाने वाले महान् कादिमत के विषय में सुनिए। १. यह पूर्वाम्नाय में **शिव दर्शन** कहा जाता है। २. दक्षिणाम्नाय में **वैष्णव दर्शन** और ३. पश्चिमाम्नाय में **गणप दर्शन** तथा ४. उत्तराम्नाय में **सौरदर्शन** नाम से जाना जाता है। ५. यही ऊर्ध्वाम्नाय में शाक्तदर्शन हो जाता है। इस प्रकार तन्त्र भी देवता के समान अनेक रूपों वाले होते हैं ॥ ५६-५७ ॥

षड्दर्शनस्य षण्मन्त्रास्त्वेकैकस्थलयोजनात्।
दर्शनाम्नाय आदिष्टो वैदिकस्य च योजनात्॥ ५८ ॥

षड्दर्शन के छः आम्नाय मन्त्रों को क्रमशः एक-एक स्थल में संयुक्त करने से दर्शनाम्नाय नाम से प्रसिद्ध हो जाते हैं, जबकि इसमें वैदिक दर्शन भी जोड़ दिया जाता है ॥ ५८ ॥

शाक्तस्थाने महेशानि महानिष्कलदर्शनम्।
दिव्याम्नायो महेशानि महादिव्यत्वकारकः॥ ५९ ॥

हे महेशानि ! शाक्त स्थान में महानिष्कलदर्शन दिव्याम्नाय बन जाता है जो महादिव्यत्वकारक है ॥ ५९ ॥

दिव्याम्नायदेवताकथनम्

श्रीबाला त्रिपुरा विद्या षोडशी पूर्वगोचरा।
तन्त्राणि पूर्ववद् देवि दक्षिणं शृणु चापरम्॥ ६० ॥

दिव्याम्नाय के देवता—१. श्रीबाला, त्रिपुरा विद्या और षोडशी **पूर्वाम्नाय** में जानी जाती है और शेष तन्त्र पूर्ववत् हैं। अब अन्य दक्षिण तन्त्र के विषय में सुनिए ॥ ६० ॥

पराप्रासादविद्या च प्रासादपरमाथवा।
बिन्द्वन्विता च सर्गान्ता बिन्दुसर्गान्वितापि च॥ ६१ ॥
परा विद्या च देवेशि दक्षिणाम्नायगोचरा।

२. हे देवेशि ! 'पराप्रासादविद्या' और प्रासादपरमा, बिन्द्वन्विता, सर्गान्ता एवं बिन्दुसर्गान्विता और पराविद्या ये दक्षिणाम्नाय में जानी जाती हैं ॥ ६१ ॥

अथ चरणदीक्षा च निर्वाणचरणावपि॥ ६२ ॥
पश्चिमाम्नाय आख्यातस्तूत्तरं शृणु सादरम्।
श्रीशाम्भवाख्यचरणौ तथा षट्शाम्भवं शिवे॥ ६३ ॥
चतुःपञ्चान्वया देवि उत्तराम्नायगोचराः।

३. चरण दीक्षा और निर्वाण एवं चरण इतने पश्चिमाम्नाय कहे गये हैं। ४. अब श्रद्धापूर्वक उत्तरमुख के आम्नाय को सुनिए। श्रीशाम्भव नामक चरण और षट्शाम्भव और चतुः पञ्चान्वय इतने उत्तराम्नाय के अन्तर्गत हैं॥ ६२-६३ ॥

मेधा साम्राज्यमेधा च सर्वसाम्राज्यरूपिणी॥ ६४ ॥
दिव्यसाम्राज्यमेधा च ऊर्ध्ववक्त्रेण चिन्त्यते।
तन्त्राणि चोपतन्त्राणि पूर्ववत् परमेश्वरि॥ ६५ ॥
दिव्याम्नायस्त्वयं प्रोक्तो विद्याम्नायं शृणु प्रिये।

विद्याम्नाय के देवता—५. मेधा, साम्राज्य मेधा और सर्वसाम्राज्यरूपिणी दिव्य साम्राज्यमेधा ये ऊर्ध्वाम्नाय के तन्त्र कहे गये हैं। हे परमेश्वरि ! तन्त्र और उपतन्त्र पूर्ववत् हैं। यहाँ तक दिव्याम्नाय कहा गया है। हे प्रिये ! अब विद्याम्नाय के विषय में सुनिए॥ ६४-६६ ॥

(क) विद्याम्नायदेवताकथनम्

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः॥ ६६ ॥
शान्तिश्च तदतीता च सर्वातीता च अष्टमी।
नवमी दिव्यसाम्राज्यमेधा राज्ञी महेश्वरि॥ ६७ ॥
क्रमेण देवदेवेशि मतमेषां कहादिकम्।

ब्रह्मा, विष्णु, रुद्र, सदाशिव और ईश्वर, शान्ति, तदतीता, सर्वातीता एवं अष्टमी विद्याम्नाय है। नवमी दिव्य साम्राज्य मेधा राज्ञी है। हे देवदेवेशि ! इनका कहादि मत क्रम कह दिया गया है॥ ६४-६७ ॥

आनन्दभैरवो देवि दक्षिणामूर्तिरिव च॥ ६८ ॥
विरूपाक्षो महेशानि राजराजेश्वरस्ततः।
सदाशिवस्ततः प्रोक्तः षष्ठः संवर्तकेश्वरः॥ ६९ ॥
दिव्यौघश्चैव सिद्धौघो मानवौघः सरन्ध्रकः।
एतेष्वधीशाः सम्प्रोक्तास्त्वेतद्भेदेन वै नव॥ ७० ॥

१. आनन्द भैरव, २. दक्षिणामूर्त्ति, ३. विरूपाक्ष, ४. राजराजेश्वर फिर ५. सदाशिव छठवाँ ६. संवर्त्तकेश्वर, ७. दिव्यौघ, ८. सिद्धौघ, ९. मानवौघ एवं १०.

सरन्ध्रक इनके अधीशों को पहले कह आये हैं। ये भेद होने से नव संख्या में हो जाते हैं ॥ ६८-७० ॥

कादिमते देवताकथनम्

अथ कादौ महेशानि अधीशान् शृणु यत्नतः ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ ७१ ॥
भैरवो बटुकश्चैव महाकालस्तथापरः ।
अक्षोभ्यो नवमः प्रोक्तो नवानां मतभेदतः ॥ ७२ ॥

अब हे महेशानि ! कादिक्रम में यत्नपूर्वक अधीशों को सुनिए । १. ब्रह्मा, २. विष्णु, ३. रुद्र, ४. ईश्वर, ५. सदाशिव, ६. भैरव, ७. बटुक, ८. महाकाल एवं नवम ९. अक्षोभ्य—ये उन नौ के मतभेद से अधीश्वर हैं ॥ ७१-७२ ॥

नवाम्नायो महेशानि महाकादिमते भवेत् ।
कालश्चैव महाकालः करालश्च तृतीयकः ॥ ७३ ॥
अतिकालश्चतुर्थश्च प्रलयेशश्च पञ्चमः ।
क्रोधराजो भवेत् षष्ठः कालिका सप्तमी भवेत् ॥ ७४ ॥
अष्टमी श्रीमहातारा नवमी छिन्नमस्तका ।
एते ह्यधीशाः सम्प्रोक्ता दिव्यौघाद्याश्च मध्यगाः ॥ ७५ ॥

हे महेशानि ! महाकादि मत में ९ आम्नाय हैं । १. काल, २. महाकाल, ३. कराल, ४. अतिकाल, ५. प्रलयेश, ६. क्रोधराज, ७. कालिका, ८. श्री महातारा और ९. छिन्नमस्तका इतने अधीश्वर हैं । दिव्यौघादि मध्यगामी हैं ॥ ७३-७५ ॥

आम्नायभेदो देवेशि एतद्भेदप्रगोचरः ।
षड्वक्त्रपञ्चवक्त्राख्यभेदेन भेदभाजनम् ॥ ७६ ॥
विद्याम्नायो महेशानि सूचितः कथ्यते शृणु ।

हे देवेशि ! आम्नाय के भेद मात्र इतने ही दिखाई पड़ते हैं । ये पञ्चवक्त्र और षड्वक्त्र भेद के भाजन कहे गये । हे महेशानि ! विद्याम्नाय की सूचना पहले दे चुके हैं । अब जो कह रहा हूँ उसे सुनिए ॥ ७६-७७ ॥

विद्याम्नायकथनम्

भुवनेशी महालक्ष्मीः पूर्वाम्नायप्रगोचरा ॥ ७७ ॥

(१) भुवनेशी और महालक्ष्मी ये दो पूर्वाम्नाय में देखी जाती हैं ॥ ७७ ॥

त्रिपुरा त्रिपुटा बाला विशालाक्ष्यन्नपूर्णिका ।
दक्षवक्त्रेण देवेशि मयाद्यापि प्रजप्यते ॥ ७८ ॥

(२) १. त्रिपुरा, २. त्रिपुटा, ३. बाला, ४. विशालाक्षी एवं ५. अन्नपूर्णा—हे देवेशि ! इनका जप मैं आज भी दक्षवक्त्र (दक्षिण मुख) से करता हूँ ॥ ७८ ॥

बगला चैव मातङ्गी सिद्धलक्ष्मीररुन्धती ।
आम्नायः पश्चिमाख्यस्तु तद्वक्त्रेण प्रजप्यते ॥ ७९ ॥

(३) १. बगला, २. मातङ्गी, ३. सिद्धलक्ष्मी एवं ४. अरुन्धती—ये पश्चिमाम्नाय के देवता हैं । इनका जप भी उसी मुख से किया जाता है ॥ ७९ ॥

तारा छिन्ना पिशाची च धूम्रा चोत्तरगोचराः ।
कालिका भेदसहिता ऊर्ध्वाम्नायप्रगोचरा ॥ ८० ॥

(४) १. तारा, २. छिन्ना, ३. पिशाची और ४. धूम्रा—ये उत्तराम्नाय की देवता हैं । (५) कालिका अपने भेदों के साथ-साथ ऊर्ध्वाम्नाय की देवता हैं ॥ ८० ॥

उपविद्याश्च पाताले विद्याम्नायः प्रकीर्तितः ।
सिद्धानि चात्र तन्त्राणि पूर्वोक्तानि महेश्वरि ॥ ८१ ॥

(६) उपविद्या पातालाम्नाय में देखी गई है । इस प्रकार विद्याम्नाय कहा गया है । हे महेश्वरि ! पहले कहे गये सभी तन्त्र सिद्ध हैं ॥ ८१ ॥

(ख) सिद्धाम्नायकथनम्

सिद्धाम्नायं प्रवक्ष्यामि येन सिद्धं जगत्त्रयम् ।
चिन्तामणिः स्पर्शमणिस्तथा कल्पद्रुमः शिवे ॥ ८२ ॥

सिद्धाम्नाय निरूपण—अब मैं सिद्धाम्नाय कह रहा हूँ जिनसे यह सारा जगत् सिद्ध हो जाता है । १. हे शिवे ! वे चिन्तामणि, स्पर्शमणि तथा कल्पद्रुम हैं ।

कामधेनुर्महेशानि पूर्वाम्नायप्रगोचराः ।
चतुष्षष्टिस्तु तन्त्राणि उपतन्त्राणि षष्टि च ॥ ८३ ॥
चूडामणिशतद्वन्द्वमर्णवानां चतुष्टयम् ।
अन्यत् सर्वं महेशानि पूर्ववत् परमेश्वरि ॥ ८४ ॥

हे महेशानि ! कामधेनु पूर्वाम्नाय में देखा जाता है । ६४ तन्त्र, ६० उपतन्त्र, २०० की संख्या में चूडामणि और चार अर्णव है । हे महेशानि ! अन्य सभी पूर्ववत् समझना चाहिए ॥ ८३-८४ ॥

सिद्धकाली षोडशी च सभेदा कालकालिका ।
दक्षवक्त्रे स्थिता नित्यं षडशीतिसमन्विता ॥ ८५ ॥

२. सिद्धकाली षोडशी भेद सहित काल कालिका ये ८६ भेदों से संयुक्त है जो शिव के दाहिने वक्त्र में स्थित हैं ॥ ८५ ॥

तन्त्राणि देवदेवेशि उपतन्त्राणि सप्ततिः ।
हंसकाली पश्चिमे तु पञ्चाशत्तन्त्रसंयुता ॥ ८६ ॥

३. हे देवदेवेशि ! समस्त तन्त्र ७० हैं और उपतन्त्र ५० तन्त्रों से समन्वित 'हंसकाली' यह पश्चिमाम्नाय है ॥ ८६ ॥

उपतन्त्राणि देवेशि पञ्चाशत् प्रभवन्ति च ।
महाकामकला गुह्या चोत्तराम्नायगोचरा ॥ ८७ ॥

४. हे देवेशि ! ५० उपतन्त्र कहे गये हैं और अत्यन्त गुप्त महाकामकला उत्तराम्नाय में देखी जाती है ॥ ८७ ॥

कलातन्त्राणि देवेशि उपतन्त्राणि विंशतिः ।
ऊर्ध्ववक्त्रस्थिता नित्यं विद्याराज्ञी महोदया ॥ ८८ ॥
द्वात्रिंशत्तन्त्रसंयुक्ता तत्त्वतन्त्राणि चोप च ।
पाताले यक्षिणी धातुवादविद्या महेश्वरि ॥ ८९ ॥
तन्त्राणां नवतिस्तत्र उपतन्त्राणि वै शतम् ।
सिद्धाम्नायस्त्वयं प्रोक्तो दिव्याम्नायं शृणु प्रिये॥ ९० ॥

५. हे देवेशि ! कलातन्त्र तथा उपतन्त्रों की संख्या २० है । ये नित्य ऊर्ध्ववक्त्र में स्थित हैं । ६. महोदया विद्याज्ञी ३२ तन्त्रों से संयुक्त तथा २४ उपतन्त्र—ये पाताल में स्थित हैं । हे महेश्वरि ! यक्षिणी धातुवाद विद्या, ९० तन्त्र एवं १०० उपतन्त्र इतने सिद्धाम्नाय कहे गये हैं । हे प्रिये ! अब दिव्याम्नाय सुनिए ॥ ८८-९० ॥

(ग) दिव्याम्नायकथनम्

हंसकाली चण्डकाली पूर्वाम्नायप्रगोचरा ।
भद्रकाली श्मशाना च दक्षवक्त्रेण जप्यते ॥ ९१ ॥

दिव्याम्नाय निरूपण—१. हंसकाली और चण्डकाली ये पूर्वाम्नाय में देखी जाती है । २. भद्रकाली और श्मशाना काली इनको दक्षिण वक्त्र से जपा जाता है ॥ ९१ ॥

गुह्यकाली कालकाली पश्चिमाम्नायदेवता ।
धनकाली सिद्धकाली चामुण्डोत्तरगोचरा ॥ ९२ ॥

३. गुह्यकाली और कालकाली ये पश्चिमाम्नाय में दृष्टिगत होते हैं । ४. धनकाली, सिद्धकाली और चामुण्डा उत्तराम्नाय में देखी जाती हैं ॥ ९२ ॥

विद्याराज्ञी भवेदूर्ध्वं रसायनं रसातले ।

रत्नाम्नायो महेशानि कथ्यते शृणु साम्प्रतम् ॥ ९३ ॥

५. विद्या राज्ञी ऊर्ध्वाम्नाय की देवता हैं और ६. रसायन रसातल (पातालाम्नाय) में देखे जाते हैं। हे महेशानि ! अब रत्नाम्नाय कह रहा हूँ, उसे सुनिए ॥ ९३ ॥

(घ) रत्नाम्नायविधानम्

अयमेव महेशानि पर्यायो ह्यागमाभिधः ।
लक्ष्मीश्चैव महालक्ष्मीः कोशविद्याचतुष्टयम् ॥ ९४ ॥
प्रणवः श्रीपराविद्या महानिष्कलदेवता ।
अजपा मातृका चैव तथैव त्रिपुरेश्वरी ॥ ९५ ॥
ऊर्मिणीति महेशानि सृष्टिः पूर्वप्रगोचरः ।

रत्नाम्नाय निरूपण—हे महेशानि ! आगम नाम से मात्र इतने ही पर्याय कहे गये हैं। (१) लक्ष्मी, महालक्ष्मी, चार कोष्ट, विद्या, प्रणव, श्रीपरा विद्या, महानिष्कल देवता, अजपा मातृका, त्रिपुरेश्वरी और ऊर्म्मिणी क्रम में **सृष्टि** पहले से ही (पूर्वाम्नाय में) चली आ रही हैं ॥ ९४-९५ ॥

ललिता चैव कामेशी रक्तनेत्रा परा स्मृता ॥ ९६ ॥
दक्षिणाम्नायदेव्यश्च स्थितिरूपेषु संस्थिताः ।
सञ्जीविनी जया चैव मृत्युसञ्जीविनी तथा ॥ ९७ ॥
वज्रप्रस्तारिणी देवी भैरवी पश्चिमे भवेत् ।
संहारश्चैव सम्प्रोक्तो भैरवी डामरेश्वरी ॥ ९८ ॥

(२) १. ललिता, २. कामेशी, ३. रक्तनेत्रा एवं ४. परा—ये दक्षिणाम्नाय की देवियाँ हैं जो 'स्थिति' रूप से संस्थित हैं। (३) सञ्जीवनी, जया, मृत्युसञ्जीवनी, वज्रप्रस्तारिणी और भैरवी देवी ये पश्चिमाम्नाय की देवता हैं। इन्हें **'संहार'** की देवता भी कहा जाता है ॥ ९६-९८ ॥

चैतन्यभैरवी देवी षट्कूटाभैरवी तथा ।
नित्याख्या भैरवी चैव भयविध्वंसिनी तथा ॥ ९९ ॥
उत्तरा भीमघोरा च कालिकाभैरवी तथा ।
श्रीसम्पद्भैरवी देवी उत्तरे लयरूपिणी ॥ १०० ॥

(४) भैरवी, डामरेश्वरी, चैतन्यभैरवी, षट्कूटाभैरवी, नित्याभैरवी, भयविध्वंसिनी, उत्तरा, भीम घोरा, कालिका भैरवी और श्रीसम्पद्भैरवी—ये उत्तराम्नाय की देवता हैं जो लयस्वरूपिणी भी हैं ॥ ९९-१०० ॥

पञ्चमी सुन्दरी चैव पारिजातेश्वरी शिवा ।

पञ्चबाणेश्वरी चैव पञ्चकामेश्वरी तथा ॥ १०१ ॥
कल्पलताऽन्नपूर्णा च मातङ्गी भुवनेश्वरी ।
षोडशीभेदसहिताऽनुग्रहार्थपरायणा ॥ १०२ ॥

(५) पञ्चमी सुन्दरी, पारिजातेश्वरी, शिवा, पञ्चबाणेश्वरी, पञ्चकामेश्वरी, कल्पलता, अन्नपूर्णा, मातङ्गी और १६ भेदों के सहित भुवनेश्वरी—ये देवियाँ सर्वदा अनुग्रह के लिये समुद्यत रहती हैं ॥ १०१-१०२ ॥

बिन्दुचक्रोर्ध्ववक्त्रेण मयाद्यापि प्रजप्यते ।
अयं प्रोक्तो महाम्नायो रत्नसंज्ञाभिधः शिवे ॥ १०३ ॥

इनका जप मैं (शम्भु) सर्वदा आज तक बिन्दुचक्रोर्ध्व मुख से करता हूँ । हे प्रिये ! यह मैंने रत्नसंज्ञा नामक महाम्नाय कहा ॥ १०३ ॥

(ङ) देशागमाख्यतन्त्रकथनम्

देशागमाख्यतन्त्राणि तदाम्नायो महेश्वरि ।
कथ्यते देवदेवेशि शृणु सावहिता भव ॥ १०४ ॥

देशागम तन्त्र एवं उनके आम्नाय—हे महेश्वरि ! अब देशागम नामक तन्त्रों को एवं उसके आम्नायों को कह रहा हूँ । सावधानी से उसे सुनिए ॥ १०४ ॥

चीनागमे सप्ततन्त्रमक्षोभ्यतन्त्रसंयुतम् ।
बौद्धागमे चैकविंशदुपतन्त्राष्टकं शिवे ॥ १०५ ॥

चीनागम में अक्षोभ्यतन्त्र से संयुक्त सात तन्त्र हैं । हे शिवे ! **बौद्धागम** में इक्कीस उपतन्त्र हैं ॥ १०५ ॥

जैनागमे कलाशी च उपतन्त्राणि पञ्च च ।
अथ पाशुपते देवि नवतन्त्राणि सादरम् ॥ १०६ ॥

जैनागम में सोलह तथा पाँच सौ चौंतीस उपतन्त्र हैं । हे देवि ! इसके बाद **पाशुपत** शास्त्र में नवतन्त्र हैं और छः उपतन्त्र हैं ॥ १०६ ॥

उपतन्त्राणि षड् देवि तथा कापालिके शृणु ।
सूर्यतन्त्रं चोपतन्त्रं वेदसंख्याभिधं शिवे ॥ १०७ ॥

कापालिक मत में अब सुनिए । हे शिवे ! इस मत में चार सूर्य तन्त्र हैं तथा चार उपतन्त्र हैं ॥ १०७ ॥

अथ पाषण्डतन्त्राणि त्रिपञ्चोपप्रभेदतः ।
पाञ्चरात्रागमे देवि दश सप्तोपभेदतः ॥ १०८ ॥

इसके बाद विभिन्न प्रकार के **पाखण्ड** तन्त्रों में तीन तन्त्र एवं पाँच उपतन्त्र

हैं। हे देवि ! **पाञ्चरात्रागम** में मूल रूप से दश तन्त्र हैं तथा सात उपतन्त्र हैं ॥ १०८ ॥

अघोरागमतन्त्राणि दशाष्टौ चोपभेदतः ।
मञ्जुघोषागमे देवि विंशत्रिंशन्महेश्वरि ॥ १०९ ॥

अघोरागम तन्त्र दस तथा आठ उपतन्त्र हैं । हे महेश्वरि ! मञ्जुघोषागम में बीस तन्त्र एवं तीस उपतन्त्र हैं ॥ १०९ ॥

भैरवागमतन्त्राणि शतसप्ततिभेदतः ।
बटुकागमतन्त्राणि द्विशताशीतिभेदतः ॥ ११० ॥

भैरवागम शास्त्र में तन्त्र भेद से एक सौ सात तन्त्र हैं । **बटुकागम** शास्त्र में तन्त्र भेद से दो सौ अस्सी तन्त्र कहे गए हैं ॥ ११० ॥

सञ्जीविन्यागमे देवि त्रिसप्त चोपभेदतः ।
सिद्धेश्वरागमे देवि दशाष्ट चोपभेदतः ॥ १११ ॥

हे देवि ! **सञ्जीवनी** आगम शास्त्र में इक्कीस तन्त्र उपभेद से हैं । हे देवि ! **सिद्धेश्वरागम** में अट्ठारह भेद कहे गये हैं ॥ १११ ॥

नीलवीरागमे सप्तदश तिष्ठन्ति पार्वति ।
अथाष्टादशतन्त्राणि मन्त्रसिद्ध्यभिधागमे ॥ ११२ ॥

हे पार्वति ! **नीलेश्वरागम** में सत्रह भेद वर्त्तमान है । **मन्त्रसिद्ध नामक आगम** में अट्ठारह तन्त्र है ॥ ११२ ॥

मृत्युञ्जयागमे देवि विंश द्वादश पार्वति ।
मायाविहारागमके त्रि पञ्च चोपभेदतः॥ ११३ ॥

हे पार्वति ! **मृत्युञ्जय आगम** में बीस तन्त्र हैं और द्वादश उपतन्त्र हैं । **माया विहारागम** तन्त्र में तीन तन्त्र है और पाँच उपभेद से उपतन्त्र हैं ॥ ११३ ॥

विश्वरूपागमे देवि नव सप्त महेश्वरि ।
योगरूपागमे देवि पञ्चाशद् दशभेदतः ॥ ११४ ॥

हे महेश्वरि ! **विश्वरूप आगम** में नौ तन्त्र हैं तथा सात उपतन्त्र हैं । हे देवि ! **योग रूपागम** में भेद के अनुसार पचास तन्त्र तथा दस उपतन्त्र है ॥ ११४ ॥

विरूपागमपर्यायै सप्ताष्टभेदतः शिवे ।
यक्षिण्यागमतन्त्राणि पञ्चसप्ततिभेदतः ॥ ११५ ॥

विरूपागम पर्याय में पन्द्रह भेद होते हैं तथा **यक्षिण्यागम** तन्त्र में पचहत्तर भेद हैं ॥ ११५ ॥

निग्रहागमतन्त्राणि शतद्विशतभेदतः ।
अयमागमपर्यायः सिद्धरूपः प्रकाशितः ॥ ११६ ॥

निग्रहागम तन्त्र भेद के अनुसार सौ तन्त्र तथा दो सौ उपतन्त्र हैं वहाँ आगम के पर्याय में जो सिद्धरूप हैं उनको प्रकाशित किया गया ॥ ११६ ॥

(च) मण्डलाम्नायकथनम्

मण्डलाम्नायो देवेशि कथ्यते शृणु सादरम् ।

मण्डलाम्नाय निरूपण—हे देवेशि ! अब मण्डलाम्नाय कहता हूँ, सादर सुनिए ॥ ११७ ॥

१. मण्डलाम्नाये पूर्वाम्नायदेवताविधानम्

आदौ ज्ञेया महालक्ष्मीस्ततो वागीश्वरी मता ॥ ११७ ॥
अश्वारूढा च मातङ्गी नित्यक्लिन्ना ततः परम् ।
भुवनेशी ततोच्छिष्टचाण्डाली भैरवी तथा ॥ ११८ ॥
शूलिनी वनदुर्गा च त्रिपुरा त्वरिता ततः ।
अघोरेति महेशानि पूर्वाम्नायः प्रकीर्तितः ॥ ११९ ॥

१. पूर्वाम्नाय के देवता—सर्वप्रथम १. महालक्ष्मी, २. वागीश्वरी, ३. अश्वारूढा, ४. मातङ्गी, ५. नित्यक्लिन्ना, ६. भुवनेश्वरी, ७. उच्छिष्ट चाण्डाली, ८. भैरवी, ९. शूलिनी, १०. वनदुर्गा, ११. त्रिपुरा, १२. त्वरिता एवं १३. अघोरा—हे महेश्वरि ! इतने पूर्वाम्नाय के देवता कहे गये हैं ॥ ११७-११९ ॥

२. दक्षिणाम्नायदेवताकथनम्

जयलक्ष्मीर्महेशानि वज्रप्रस्तारिणी तथा ।
धूमावत्यन्नपूर्णा च कालसङ्कर्षिणी तथा ॥ १२० ॥
धनदा कुक्कुटी भोगवती च शबरेश्वरी ।
कुब्जिका सिद्धलक्ष्मीश्च बाला च त्रिपुरा ततः ॥ १२१ ॥
दक्षिणाम्नाय आख्यातः पश्चिमं शृणु पार्वति ।

२. दक्षिणाम्नाय के देवता—१. जयलक्ष्मी, २. वज्रप्रस्तारिणी, ३. धूमावती, ४. अन्नपूर्णा, ५. कालसङ्कर्षिणी, ६. धनदा, ७. कुक्कुटी, ८. भोगवती, ९. शवरेश्वरी, १०. कुब्जिका, ११. सिद्धलक्ष्मी, १३. बाला और १३. त्रिपुरा—यहाँ तक दक्षिणाम्नाय कहा गया है ॥ १२०-१२२ ॥

३. पश्चिमाम्नायदेवताकथनम्

ततो नीलपताका च चण्डघण्टा त्रिकण्टकी ॥ १२२ ॥

चण्डेश्वरी भद्रकाली गुह्यकाली महेश्वरी ।
अनङ्गमाला चामुण्डा वाराही बगलाऽपि च ॥ १२३ ॥
जयदुर्गा नारसिंही पश्चिमाम्नाय ईरितः ।

३. पश्चिमाम्नाय के देवता—हे पार्वति! अब पश्चिमाम्नाय की बात सुनिए। १. नीलपताका, २. चण्डघण्टा, ३. त्रिकण्टकी, ४. चण्डेश्वरी, ५. भद्रकाली, ६. गुह्यकाली, ७. महेश्वरी, ८. अनङ्गमाला, ९. चामुण्डा, १०. वाराही, ११. बगला, १२. जयदुर्गा एवं १३. नारसिंही—यहाँ तक पश्चिमाम्नाय है ॥ १२०-१२४ ॥

४. उत्तराम्नायदेवताकथनम्

ब्रह्माणी वैष्णवी चैव माहेश्यैन्द्री महेश्वरि ॥ १२४ ॥
हरसिद्धा च फेत्कारी बगलेशी च नाकुली ।
श्रीमृत्युहारिणी देवि चिन्तामणिनृसिंहकौ ॥ १२५ ॥
हयग्रीवो भैरवश्च भैरवश्चरणायुधः ।
क्षेत्रपालो महाकालस्त्रिजटैकजटा तथा ॥ १२६ ॥
महोग्राख्या महोच्छुष्मा हेलक्की नीलशारदा ।
वामा महोल्का देवेशि श्रीमहाकालसुन्दरी ॥ १२७ ॥
चाण्डाली धरणी कर्णपिशाची ब्रह्मतारका ।
चाण्डाली च तथा श्यामा प्रलयत्रिपुरा तथा ॥ १२८ ॥
सुरवल्लभा सुन्दरी च रक्तचाण्डालिनी तथा ।
उत्तराम्नाय आदिष्टस्तूर्ध्वाम्नायं शृणु प्रिये ॥ १२९ ॥

४. उत्तराम्नाय के देवता—१. ब्राह्मणी, २. वैष्णवी, ३. माहेश्वरी, ४. ऐन्द्री, ५. हरसिद्धा, ६. फेत्कारी, ७. बगलेशी, ८. नाकुली, ९. श्रीमृत्युहारिणी, १०. चिन्तामणि, ११. नृसिंह, १२. हयग्रीव, १३. भैरव और भैरव चरणायुध, १४. क्षेत्रपाल, १५. महाकाल, १६. त्रिजटा, १७. एकजटा, १८. महोग्रा, १९. महोच्छुष्मा, २०. हेलक्की, २१. नीलशारदा, २२. वामा, २३. महोल्का, २४. श्रीमहाकालसुन्दरी, २५. चाण्डाली, २६. धरणी, २७. कर्णपिशाची, २८. ब्रह्मतारका, २९. चाण्डाली, ३०. श्यामा, ३१. प्रलय, ३२. त्रिपुरा, ३३. सुखवल्लभा, ३५. सुन्दरी एवं ३६. रक्त चाण्डालिनी—इतने उत्तराम्नाय के देवता कहे गये हैं। अब हे प्रिये ! ऊर्ध्वाम्नाय के देवताओं को सुनिए ॥ १२५-१२९ ॥

५. ऊर्ध्वाम्नायदेवताविधानम्

काली तारा छिन्नमस्ता तथा कामकलाऽपि च ।
श्रीमहाषोडशी चेति ऊर्ध्वाम्नायः प्रकीर्तितः ॥ १३० ॥

५. ऊर्ध्वाम्नाय के देवता—काली, तारा, छिन्नमस्ता, कामकला और श्रीमहाषोडशी—ये ऊर्ध्वाम्नाय के देवता कहे गये हैं ॥ १३० ॥

६. पातालाम्नायदेवताकथनम्

रसातलाम्नायरूपं शृणु यत्नेन शाम्भवि ।
समस्तं शाबरं देवि समस्ताघोरजातयः ॥ १३१ ॥
चीनबौद्धागमौ जैनाः समस्तं चेटकादिकम् ।
पातालसंज्ञे देवेशि सर्वमन्तर्गतं भवेत् ॥ १३२ ॥

६. पातालाम्नाय के देवता—हे शाम्भवि ! अब यत्नपूर्वक रसातल आम्नाय के देवता सुनिए । हे देवि ! समस्त शाबर, समस्त अघोरजातियाँ, चीन, बौद्धागम, जैन एवं समस्त चेटकादिक हे देवि ! ये सभी पाताल आम्नाय के अन्तर्गत आ जाते हैं ।

पितृभूवासिनी देवि चण्डकात्यायनी तथा ।
महामण्डलयुग्मं च यक्षिण्यष्टौ महेश्वरि ॥ १३३ ॥
कालकूटसर्पभूपाः किन्नर्यश्चेटका अपि ।
पातालाम्नाय आख्यातः कलौ तूर्णफलप्रदः ॥ १३४ ॥

हे देवि ! पितृभूनिवासिनी, चण्डकात्यायनी, दो महामण्डल, आठ यक्षिणी, कालकूट सर्प के अधीश्वर, किन्नरी एवं चेटका इतने पातालाम्नाय के देवता कहे गये हैं जो कलि में शीघ्र फल देते हैं ॥ १३३-१३४ ॥

(छ) पञ्चकृत्याम्नायरूपकथनम्

पञ्चकृत्याम्नायरूपं शृणु यत्नेन शाङ्करि ।
पूर्वाम्नायः सृष्टिरूपो मन्त्रयोगो महेश्वरि ॥ १३५ ॥
चतुर्विंशतिसङ्केतैर्मन्त्रैस्तन्त्रैर्विभूषितः ।

(छ) पञ्चकृत्याम्नाय कथन—हे शाङ्करि अब यत्नपूर्वक पञ्चकृत्य आम्नाय को सुनिए । (१) हे महेश्वरि ! उसमें पूर्वाम्नाय सृष्टि रूप है, जिसमें मन्त्र का योग होता है । वह २४ संकेतों से एवं मन्त्रों तथा तन्त्रों से विभूषित है ॥ १३५ ॥

अथ वै दक्षिणाम्नायः स्थितिरूपः सनातनः ॥ १३६ ॥
भक्तियोगो महेशानि पञ्चविंशतितन्त्रयुक ।

(२) इसके बाद दक्षिणाम्नाय है जो स्थिति रूप सनातन है । हे महेशानि ! भक्तियोग २५ तन्त्रों से युक्त कहा गया है, ॥ १३६ ॥

संहृतिः पश्चिमाम्नायः कर्मयोगः सनातनः ॥ १३७ ॥
द्वात्रिंशत्तन्त्रमन्त्रैस्तु संयुक्तः परमेश्वरि ।

(३) संहार पश्चिमाम्नाय है, जो कर्मयोग है और सनातन है । हे परमेश्वरि ! वह ३२ तन्त्र मन्त्रों से संयुक्त है ॥ १३७ ॥

विधानमुत्तराम्नायोऽनुग्रहो ज्ञानयोगवान् ॥ १३८ ॥
षट्त्रिंशन्मन्त्रतन्त्रैश्च सङ्केतैः परिभूषितः ।

(४) उत्तराम्नाय वह विधान है जो अनुग्रहशील तथा ज्ञानवान् है । वह ३६ मन्त्रों तन्त्रों तथा संकेतों से विभूषित है ॥ १३८ ॥

सर्वत्राम्नायसङ्केतैर्मन्त्रतन्त्रैरपि प्रिये ॥ १३९ ॥
ब्रह्मानन्दस्वरूपोऽयमूर्ध्वाम्नायः प्रकीर्तितः ।
साम्राज्ययोगो देवेशि पराप्रासादरूपधृक् ॥ १४० ॥

(५) हे प्रिये ! इतना ही नहीं यह सर्वाम्नाय के संकेतों से तथा मन्त्र तन्त्रों से युक्त होने के कारण ऊर्ध्वाम्नाय ब्रह्मानन्द स्वरूप कहा जाता है । हे देवेशि ! साम्राज्य योग 'परा प्रासाद' मन्त्र का रूप धारण करने वाला है ॥ १३९-१४० ॥

यक्षिण्याद्यप्सराद्यन्ताः पातालाम्नायगोचराः ।
संयोगयोगो देवेशि मन्त्रतन्त्रैश्च भूषितः ॥ १४१ ॥

(६) यक्षिणी से लेकर अप्सरा पर्यन्त सभी विषय पातालाम्नाय में प्राप्त होते हैं । हे देवेशि ! यह संयोग, योग, मन्त्र तथा तन्त्रों से विभूषित है ॥ १४१ ॥

सहस्रसङ्केतयुतः सिद्धवर्यः प्रपूज्यते ।
अयमाम्नायसन्दोहो रहस्यातिरहस्यधृक् ॥ १४२ ॥

जिसके प्रत्येक वर्ण सिद्ध हैं और जो सहस्र संकेतों से युक्त है तथा जिसकी पूजा की जाती है, वह आम्नायों के स्वरूप रहस्य से भी अति रहस्यपूर्ण हैं ॥ १४२ ॥

केवलं कालिकायां च षडाम्नाया महेश्वरि ।
दशवक्त्रा गुह्यकाली राजराजेश्वरी मता ॥ १४३ ॥

हे महेश्वरि ! केवल कालिका में ही छः आम्नाय देखे जाते हैं और गुह्यकाली के दशमुख हैं जो राजराजेश्वरी कही जाती हैं ॥ १४३ ॥

(ज) कालिकाम्नायपर्यायकथनम्

कालिकाम्नायपर्यायः स्वतन्त्रः परिकीर्तितः ।
ऊर्ध्ववक्त्रं महेशानि दीपकाख्यं प्रकीर्तितम् ॥ १४४ ॥

कालिकाम्नाय पर्याय सर्वथा स्वतन्त्र कहा गया है । हे महेशानि ! ऊर्ध्ववक्त्र को ही **दीपक** नाम से कहा जाता है ॥ १४४ ॥

विंशतिर्मन्त्रतन्त्रैस्तु भूषितं परमेश्वरि ।
चण्डयोगेश्वरीरूपं तदेव परिकीर्तितम् ॥ १४५ ॥

हे परमेश्वरि ! यह २० मन्त्र तन्त्रों से भूषित है, उसी को **'चण्डयोगेश्वरी'** रूप भी कहा जाता है ॥ १४५ ॥

सिंहवक्त्रं तु तदधः श्रीसिद्धकालिका मता ।
दशतन्त्रसमायुक्ता तदधो हरवक्त्रकम् ॥ १४६ ॥

उसके नीचे **'श्रीसिद्धकालिका'** हैं जिनका मुख सिंह के समान है । उसके नीचे दशतन्त्र से संयुक्त **हरवक्त्र तन्त्र** कहे जाते हैं ॥ १४६ ॥

कृष्णं सङ्कर्षणं देवि तन्त्राणां तु त्रयोदश ।
वामे कपीन्द्रवक्त्रं च कुब्जिकाख्यं महेश्वरि ॥ १४७ ॥

हे देवि ! **कृष्ण** और **सङ्कर्षण** आदि १३ तन्त्र हैं । हे महेश्वरि ! **'कपीन्द्रवक्त्र'** तथा **'कुब्जिका'** नामक तन्त्र वाममार्ग के हैं ॥ १४७ ॥

पञ्चविंशतितन्त्राणि दक्षे शूकरवक्त्रकम् ।
त्रैलोक्यडामरं तच्च तन्त्राष्टकसमन्वितम् ॥ १४८ ॥

२५ तन्त्र **शूकरवक्त्र** वाले हैं जो दक्षिण मार्ग के कहे गये हैं । वह ८ तन्त्रों से समन्वित हैं और जिसे **त्रैलोक्य डामर** भी कहा जाता है ॥ १४८ ॥

तार्क्षं वामे पिङ्गचण्डं सुन्दरीवक्त्रमीरितम् ।
तन्त्राणां तु चतुष्षष्टिस्तत्र तिष्ठति पार्वति ॥ १४९ ॥

तार्क्ष तन्त्र वाममार्गी है और पिङ्गचण्ड को ही **'सुन्दरीवक्त्र'** कहा जाता है । हे पार्वति ! उसमें ६४ तन्त्रों का निवास है ॥ १४९ ॥

हरितं मकरं दक्षे महासंहारिणी स्मृता ।
कलातन्त्राणि देवेशि शुभ्रं च गजवक्त्रकम् ॥ १५० ॥

हरित मकर दक्षमार्गी तन्त्र है । इसको महासंहारिणी शक्ति कहा जाता है । हे देवेशि ! **कला तन्त्र** का वर्ण शुभ है और उसका मुख हाथी के समान कहा गया है ॥ १५० ॥

प्रत्यङ्गिरा च सम्प्रोक्ता नवतन्त्रसमन्विता ।
दक्षे श्यामं हयास्यं च सिद्धयोगेश्वरीमुखम् ॥ १५१ ॥

जिसे **'प्रत्यङ्गिरा'** कहा जाता है वह नौ तन्त्रों से समन्वित है । **सिद्ध योगेश्वरी** नामक तन्त्र दक्षमार्गी तन्त्र है, जिसका वर्ण श्याम है और मुख घोड़े के समान है ॥ १५१ ॥

षट्त्रिंशत्तन्त्रसङ्केतैः संयुता परमेश्वरि ।
महासिद्धकराला च कलातन्त्रसमन्विता ॥ १५२ ॥

हे परमेश्वरि ! ३६ तन्त्रों के संकेत से युक्त '**महासिद्धिकराला**' तन्त्र है । जो कला तन्त्र से समन्वित भी है ॥ १५२ ॥

द्विद्विक्रमेण देवेशि षडाम्नायाः प्रकीर्तिताः ।
एकमूर्ध्वे च पाताले चन्द्रसंख्या महेश्वरि ॥ १५३ ॥

हे देवेशि ! दो-दो के क्रम से छः आम्नाय कहे गये हैं । हे महेश्वरि ! इसी प्रकार ऊर्ध्व आम्नाय में और पातालाम्नाय में उनकी संख्या एक है ॥ १५३ ॥

चतुर्दिक्षु भवेदष्टौ वक्त्राणि परमेश्वरि ।
रहस्यातिरहस्यं च रहस्यातिरहस्यकम् ॥ १५४ ॥

हे परमेश्वरि ! चारो दिशाओं में मिलाकर जिसके आठ मुख हैं । यह रहस्य है, अति रहस्य है, रहस्यातिरहस्य है ॥ १५४ ॥

गोपनीयं गोपनीयं गोपनीयं स्वयोनिवत् ।
महाराज्यं च स्वाराज्यं सर्वमन्त्रैर्ध्रुवं भवेत् ॥ १५५ ॥

अपनी योनि के समान इसे गुप्त रखे, गुप्त रखे, गुप्त रखे । इसके सभी मन्त्रों से महाराज्य एवं साम्राज्य प्राप्त होता है यह निश्चित है ॥ १५५ ॥

एतज्ज्ञानेन देवेशि त्रैलोक्यविजयी भवेत् ।
प्राणा देयाः शिरो देयं नेदं वाच्यं चकुत्रचित् ॥ १५६ ॥

हे देवेशि ! इसके ज्ञान से साधक त्रैलोक्यविजयी होता है । प्राण भले ही दे दे, शिर भले दे दे, किन्तु इसे किसी से कुछ भी न कहे ॥ १५६ ॥

(झ) पर्यायागमरूपकथनम्

पर्यायागमरूपत्वं कथ्यते शृणु साम्प्रतम् ।
देशपर्यायभेदो हि पूर्वाम्नायः प्रकीर्तितः ॥ १५७ ॥

पर्यायागम—अब पर्यायागम कह रहा हूँ, उसे सुनिए । (१) देश पर्याय भेद को पूर्वाम्नाय कहा जाता है ॥ १५७ ॥

अथ वै कालपर्यायो दक्षिणाम्नायः ईरितः ।
अथ आगमपर्यायः पश्चिमाम्नाय एव च ॥ १५८ ॥

(२) काल पर्याय को दक्षिणाम्नाय कहा गया है और (३) आगम पर्याय को पश्चिमाम्नाय कहा जाता है ॥ १५८ ॥

एवं दर्शनपर्यायस्तूत्तराम्नाय एव हि ।
अथायतनपर्यायः पातालाम्नायगोचरः ॥ १५९ ॥

इसी प्रकार (४) दर्शन पर्याय को उत्तराम्नाय कहा गया है और (५) आयतन पर्याय पातालाम्नाय के नाम से प्रसिद्ध है ॥ १५९ ॥

विद्यापर्यायनामाख्यस्तूर्ध्वाम्नायप्रगोचरः ।
पर्यायाम्नाय आख्यातः किमन्यच्छ्रोतुमिच्छसि ॥ १६० ॥

(६) विद्या पर्याय को ऊर्ध्वाम्नाय कहा गया है । यहाँ तक पर्याय नामों का विवरण कहा गया है । अब आप और क्या सुनना चाहती हैं ॥ १६० ॥

श्रीदेव्युवाच–

देवेश श्रोतुमिच्छामि बटुकाम्नायमुत्तमम् ।

श्रीदेवी ने कहा—हे देवेश ! अब मैं 'बटुकाम्नाय' सुनना चाहती हूँ ।

(ञ) बटुकाम्नायकथनम्

श्रीशिव उवाच–

पूर्वाम्नाये तु भुवना त्रयोविंशतितन्त्रयुक् ॥ १६१ ॥

बटुकाम्नाय निरूपण—श्रीशिव जी ने कहा—(१) पूर्वाम्नाय में **भुवना** २३ तन्त्रों से युक्त हैं ॥ १६१ ॥

सृष्टियोगः पूर्ववत् स्याद् दक्षिणं शृणु सादरम् ।
स्थितिर्लक्ष्मीर्दक्षिणे च चतुर्विंशतितन्त्रयुक् ॥ १६२ ॥

सृष्टियोग पूर्ववत् है, अब दक्षिण मार्ग को सुनिए । (२) दक्षिणमार्ग में रहने वाली लक्ष्मी **'स्थिति'** स्वरूप हैं और २४ तन्त्रों से युक्त हैं ॥ १६२ ॥

पञ्चविंशतितन्त्रैश्च बगला पश्चिमे लयः ।
विधानमुत्तरे छिन्ना षट्त्रिंशत्तन्त्रसंयुता ॥ १६३ ॥

(३) २५ तन्त्रों के साथ **बगला** पश्चिम मार्ग में 'लय' योग में हो जाती हैं और (४) २६ तन्त्रों से युक्त **छिन्ना** विधान सहित उत्तर मार्ग में हैं ॥ १६३ ॥

ऊर्ध्वे काली ग्रहोऽस्तीति सप्तसप्ततितन्त्रयुक् ।
विराड्रूपा मधुमती पाताले राज्ययोगधृक् ॥ १६४ ॥

(५) ७७ तन्त्रों से युक्त काली ऊर्ध्वमुख रहती हैं और (६) विराट् रूपा **मधुमती** पाताल में राज्य सञ्चालन करती हैं ॥ १६४ ॥

अष्टाविंशतितन्त्रैस्तु संयुता परमेश्वरि ।
इदं रहस्यं देवेशि गोपनीयं स्वयोनिवत् ॥ १६५ ॥

हे परमेश्वरि ! मधुमती विद्या २८ तन्त्रों से युक्त हैं । हे देवेशि ! यह रहस्य है, जिसे अपनी योनि के समान छिपाना चाहिये ॥ १६५ ॥

तारा काली छिन्नमस्ता त्रिशक्तिमात्रगोचरः ।
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ १६६ ॥

इति श्रीमदक्षोभ्यतारासंवादे शक्तिसङ्गमहातन्त्रराजे तारासूक्ते पर्यायाम्नायादिनिर्णयो नाम सप्तमः पटलः ॥ ७ ॥

* * *

तारा, काली एवं छिन्नमस्ता ये त्रिशक्ति मात्र मूल में देखी जा सकती हैं, यहाँ तक संक्षेप में कहा गया । अब आप और क्या जानना चाहती हैं ॥ १६६ ॥

॥ इस प्रकार श्रीशक्तिसंगममहातन्त्रराज के उत्तरभाग में छिन्नमस्ता चतुर्थ खण्ड के श्रीमदक्षोभ्यमहोग्रतारासंवाद के तारासूक्त में महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय कृत 'पर्यायाम्नायादिनिर्णय' नामक सप्तम पटल की 'सुधा' नामक हिन्दी व्याख्या पूर्ण हुई ॥ ७ ॥

* * *

अष्टमः पटलः

यन्त्रप्रस्तारादिनिर्णयकथनम्

श्रीदेव्युवाच–

देवेश श्रोतुमिच्छामि रहस्यं पूर्वसूचितम् ।

*** सुधा ***

हे देवेश ! अब जिस रहस्य को आपने पहले सूचित किया है उसे सुनना चाहती हूँ ।

श्रीशिव उवाच–

रहस्यातिरहस्यं च कथ्यते शृणु साम्प्रतम् ॥ १ ॥

श्रीशिव जी ने कहा—अब मैं आपसे रहस्य से भी अतिरहस्य कहता हूँ उसे सुनिए ॥ १ ॥

निर्गुणब्रह्मकथनम्

आदिनारायणः साक्षात् परशम्भुः स एव हि ।
तदेव निर्गुणं ब्रह्म बृहत्त्वाद् ब्रह्म कीर्तितम् ॥ २ ॥

साक्षात् आदिनारायण जो स्वयं परशम्भु कहे जाते हैं, वही निर्गुण ब्रह्म है, वृहत् होने से ब्रह्म कहे जाते हैं ॥ २ ॥

सगुणब्रह्मकथनम्

शुद्धस्फटिकवद् देवि सैव श्रीप्रकृतिर्वरा ।
वासुदेवो हरो ब्रह्मा तारिणी प्रकृतिः स्वयम् ॥ ३ ॥

हे देवि ! वही शुद्ध स्फटिक के समान वर्ण होने से श्री है, प्रकृति हैं, वरा हैं और वही वासुदेव, हर, ब्रह्मा, तारिणी तथा स्वयं प्रकृति भी हैं ॥ ३ ॥

यां विचिन्त्य महादेवि जलशायी स्वयं हरिः ।
जलापच्छमनी तारा सैव प्रोक्ता महेश्वरी ॥ ४ ॥

हे देवि ! जिनका ध्यान करते हुए स्वयं भगवान् विष्णु जल में शयन करते

हैं, वही जल में आपत्ति की शान्ति करने वाली (जलापच्छमनी) तारा और महेश्वरी कही जाती हैं ॥ ४ ॥

आपो नारायणः प्रोक्तस्तारां तोयप्लवे स्मरेत्।
स्मरणादेव विद्याया निर्गुणो योगपट्टधृक्॥ ५ ॥

आप (जल) को ही नारायण कहा जाता है यदि जल के समूह में तारा का स्मरण करते हुए विद्या के स्मरण मात्र से साधक निर्गुण एवं योगपट्ट धारक हो जाता है ॥ ५ ॥

महाशक्तिस्वरूपकथनम्

आदिमध्यान्तरहिता गुणातीता महोज्ज्वला।
आदर्शवत् स्वच्छरूपा महाशक्तिः प्रकीर्तिता॥ ६ ॥

वह विद्या आधना रहिता है, गुणातीता है और महोज्ज्वला है, वह महाशक्ति दर्पण के समान स्वच्छ स्वरूपा है ॥ ६ ॥

महाशक्तिदर्शनकथनम्

उभयोर्मध्यभागे तु प्रतिबिम्बं च यद् भवेत्।
तस्य चास्याः प्रबिम्बं तु शिवे संदृश्यते स्फुटम्॥ ७ ॥
शिवस्य प्रतिबिम्बं तु प्रकृतौ दृश्यते स्फुटम्।
केचिच्छक्तीति संप्राहुः केचिच्छिव इतीरिरे॥ ८ ॥

दोनों के मध्य भाग में जो दोनों का प्रतिबिम्ब होता है उन विष्णु का तथा उस प्रकृति का जो प्रतिबिम्ब स्पष्ट रूप से दिखाई पड़ता है वह स्पष्ट रूप से शिव में दिखाई पड़ता है कोई उसी को **शक्ति** कहते हैं कोई उसे **शिव** कहते हैं ॥ ७-८ ॥

केचिन्नारायणं प्राहुः सैव काली च तारिणी।
उभयोः प्रतिबिम्बं तु ह्यर्धनारीश्वरो मतः॥ ९ ॥

कोई उसे **नारायण** कहते हैं, कोई **काली** और कोई **तारिणी** कहते हैं, दोनों का मिला हुआ प्रतिविम्ब **'अर्धनारीश्वर'** कहा गया है ॥ ९ ॥

पराप्रासादविद्या तु सैवात्र परिकीर्तिता।
प्रतिबिम्बं भवेन्माया ततो ब्रह्म महेश्वरः॥ १० ॥

वह **पराप्रासाद** विद्या भी कही गई है । उसका प्रतिबिम्ब **माया** है उसके बाद उसी को **ब्रह्म** और **महेश्वर** भी कहा जाता है ॥ १० ॥

शक्तितः सृष्टिकथनम्

विष्णुरीश्वर इत्याद्या लोकपालादयः शिवे।

सृष्टिर्जाता महेशानि तयोरंशसमुद्भवा ॥ ११ ॥

हे शिवे ! उन्हीं दोनों से **विष्णु, ईश्वर** इत्यादि की तथा लोकपालादिकों की, किं बहुना, समस्त सृष्टि की उत्पत्ति हुई है ॥ ११ ॥

अविनाशी सदा स्थायी शम्भुश्च प्रकृतिस्तथा ।
आद्यन्तरहिता पूर्णा चिद्घना सत्स्वरूपिणी॥ १२ ॥

शम्भु तथा **प्रकृति** अविनाशी हैं, स्थायी हैं, आदि एवं अन्त रहिता पूर्णा चिद्घना सारस्वरूपिणी है ॥ १२ ॥

सर्वोत्तरं तदाम्नाय सर्वं तत्र प्रतिष्ठितम् ।
महोग्रतारा सा विद्या महाक्रूरा प्रकीर्तिता॥ १३ ॥

सबसे श्रेष्ठ उसका आम्नाय है, जिसमें सब कुछ प्रतिष्ठित है । वही **महोग्रतारा** विद्या है जो **महाक्रूरा** भी कही जाती है ॥ १३ ॥

महामत कथनम्

कादिहादिमताधीशस्तारोपासनतत्परः ।
अन्यथा नाधिकारीतिमहामतमिदं शिवे॥ १४ ॥

कादि हादि मतों का अधीश्वर ही तारा की उपासना में तत्पर रह सकता है, इसके अतिरिक्त कोई अधिकारी नहीं है, यह **'महामत'** कहा जाता है ॥ १४ ॥

अन्यथा विकलो भूयान्नात्र कार्या विचारणा ।

उग्रतारानिरुक्तिकथनम्

उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्तिता॥ १५ ॥

यदि इसके विपरीत किसी ने साधना कर तारा की उपासना की तो वह व्याकुल (विक्षिप्त) हो जाता है, इसमें विचार की आवश्यकता नहीं । यत: वह उग्र आपत्ति से पार लगाती हैं इसलिये उन्हें **'उग्रतारा'** भी कहा जाता है ॥ १५ ॥

तेजःप्रभावसंदर्शी भवेदत्रान्यथा कथन् ।
हंसतारा महाविद्या योगपट्टेश्वरी मता॥ १६ ॥

उन उग्रतारा का उपासक उनके तेज के प्रभाव को प्रत्यक्ष देखता है, यह असत्य नहीं है । **हंसतारा** नाम की महाविद्या **योगपट्टेश्वरी** कही जाती है ॥ १६ ॥

सम्प्रदायभेदेन विद्यानामकथनम्

जैनाः प्रभावतीं प्राहुः शाक्ताः शक्तिं समूचिरे ।
बौद्धारतारां च संप्राहुः कौलाश्चक्रेति संविदुः ॥ १७ ॥

सम्प्रदाय भेद से विद्या नाम का निरूपण—१. जैन उस विद्या को **प्रभावती** कहते हैं, २. शाक्त **शक्ति** कहते हैं, ३. बौद्ध **तारा** कहते हैं एवं ४. कौल **चक्र** कहते हैं ।। १७ ।।

चीना महोग्रां संप्राहुः काद्याः कालीं समूचिरे ।
हाद्याः श्रीसुन्दरीं प्राहुः कादिहादिमतेश्वरीम् ।। १८ ।।

५. चीन वाले उसे **महोग्रा** कहते हैं, ६. कादि मत वाले **काली** कहते हैं, ७. हादि मत वाले 'कादि हादि' मत की ईश्वरी होने के कारण उसे **श्रीसुन्दरी** कहते हैं ।। १८ ।।

कहेत्येवं महामन्त्ररतूत्तराम्नायगोचरः ।
जीवमात्रे महेशानि कहेत्येवं सरस्वतीम् ।। १९ ।।

'क ह' यह मन्त्र उत्तराम्नाय में गोचर होता है । हे महेशानि ! जीवमात्र में वह 'क ह' सरस्वती रूप से स्थित है ।। १९ ।।

जीवो हंसेति सम्प्राहुर्हसः सोहंस्वरूपिणी ।
हकारः प्रथमः पक्षः सकारस्तु द्वितीयकः ।। २० ।।

८. जीव उसे **हंस** कहते हैं और हंस सोऽहं का स्वरूप है, हकार इसमें प्रथम पक्ष है और सकार द्वितीय पक्ष है ।। २० ।।'

पक्षद्वयविनिर्मुक्ता तारा कामकला मता ।
वागनुत्तरविद्या तु तत्रोत्पन्ना महेश्वरि ।। २१ ।।

९. किन्तु तारा इन दोनों पक्षों से विनिर्मुक्त है उसे **कामकला** कहा जाता है । हे महेश्वरि ! उससे निरुत्तर करने वाली वाणी की उत्पत्ति हुई है ।। २१ ।।

सोकारे परमेशानि सकारः प्रथमो भवेत् ।
हकारस्तु द्वितीयः स्यात् तेन प्रणवरूपिणी ।। २२ ।।

१०. 'सोहम्' इसमें प्रथम वर्ण सकार है और हकार द्वितीय वर्ण है इसलिये यह **प्रणव** स्वरूपा है ।। २२ ।।

प्रणवो निर्गुणः प्रोक्तः सर्वाद्यो वेदगोचरः ।
वेदमाता तु गायत्री तदाद्यः प्रणवः स्मृतः ।। २३ ।।
प्रणवोपासिनां प्रोक्ता निर्गुणोपासना भवेत् ।
गायत्रीं जपमानारते सर्वे शाक्ता द्विजातयः ।। २४ ।।

११. जो प्रणव की उपासना करते हैं उनकी उपासना निर्गुण कही जाती है, जो द्विजाति **गायत्री** का जप करते हैं वे सभी शाक्त हैं ।। २३-२४ ।।

गायत्रीं वेदमाता या सैव काली च तारिणी ।
छिन्ना प्रेमास्पदा सैव विश्वामित्रप्रसाधिता ॥ २५ ॥

गायत्री वेदमाता है, वही काली है और वही तारिणी भी है, वही छिन्नमस्तका है, प्रेमास्पदा है, विश्वामित्र ने उन्हीं को सिद्ध किया था ॥ २५ ॥

शूद्राश्च पशवः प्रोक्ताः शाक्ताः सर्वे द्विजातयः ।
अपि चाण्डालजातिरथस्तारोपासनतत्परः ॥ २६ ॥
पूर्णदीक्षासमायुक्तः सैव श्रीकालिकाम्बिका ।
तव यत्नेन जातित्वे कारणं न मयेरितम् ॥ २७ ॥

शूद्र 'पशु' कहे गये हैं । सभी द्विजाति शाक्त है भले ही जाति से कोई चाण्डाल हो किन्तु यदि वह तारा की उपासना में तत्पर है और पूर्वा दीक्षा से समायुक्त है तो वह निश्चय ही श्रीकालिका अम्बा स्वरूप है । मैंने आपके न पूछने के कारण (शक्ति पूजा में) जाति में कारण का निर्देश नहीं किया है ॥ २६-२७ ॥

अत्रार्थे प्रत्ययो देवि ध्रुवं पूर्वं यथा भवेत् ।
वर्षमात्रभवो बालः पूर्णदीक्षासमन्वितः ॥ २८ ॥

हे देवि ! इस विषय में निश्चित रूप से पूर्व में जो विश्वास किया जाता है उसके लिये १ वर्ष तक बाल की परीक्षा करे तब उसे पूर्ण दीक्षा से संयुक्त करे ॥ २८ ॥

तदन्यो हि ऋषिर्देवि वर्षसहस्रभागपि ।
ऋषिः कनिष्ठो देवेशि बालः श्रेष्ठः प्रकीर्तितः ॥ २९ ॥

हे देवि ! इस प्रकार से दीक्षित बाल उनकी अपेक्षा श्रेष्ठ है उसके प्रति १००० वर्ष का अन्य ऋषि भी कनिष्ठ है ॥ २९ ॥

द्विसप्ततिसहस्रासु देहसंस्थासु नाडिषु ।
मुख्या सहस्रद्वितयी तन्मध्ये त्रितयी वरा ॥ ३० ॥

इस शरीर में कुल ७२००० नाड़ियाँ स्थित हैं, जिसमें दो सहस्र श्रेष्ठ हैं उसमें भी मात्र दो ही श्रेष्ठ हैं ॥ ३० ॥

नाडीत्रितयरूपिणी शक्तिकथनम्

काली तारा तथा छिन्ना नाडीत्रितयरूपिणी ।
जीवमात्रे महेशानि सदा तिष्ठति नित्यशः ॥ ३१ ॥

काली, तारा तथा छिन्ना ये सभी नाडी स्वरूपा ही हैं । ये नित्य सभी जीवों में निवास करती हैं ॥ ३१ ॥

अज्ञानात् फलादापि स्याद् ज्ञानाद्राज्यमवाप्नुयात् ।
पृष्ठवंशस्थितो दण्डो मेरुदण्डः प्रकीर्तितः ॥ ३२ ॥

ये न जाने जाने पर भी अज्ञानावस्था में फल प्रदान करती हैं, ज्ञान होने पर तो साधक राज्य प्राप्त कर लेता है । इसके बाद पीठवंश में मेरुदण्ड स्थित है ॥ ३२ ॥

तदाचाराद् ब्रह्मतारा दण्डमाश्रित्य नाडयः ।
तिष्ठन्ति देवदेवेशि तत्तद्योगेन सिद्धयः ॥ ३३ ॥

उस मेरुदण्ड का आश्रय लेकर 'ब्रह्मतारा' नामक नाड़ी निवास करती है । हे देवि ! उसके योग से वहाँ सारी सिद्धियाँ निवास करती हैं ॥ ३३ ॥

खट्वाङ्गेति स एवोक्तः पृष्ठवंशः प्रकीर्तितः ।
शक्तिन्यासे महेशानि खट्वाङ्गात्तु यतः स्मृतः॥ ३४ ॥

जिसे पृष्ठवंश कहा जाता है, इसी को 'खट्वाङ्ग' भी कहा जाता है । हे महेशानि ! क्योंकि शक्तिन्यास में खट्वाङ्ग की आवश्यकता होती है ॥ ३४ ॥

तत्तन्नाडीनादयोगाद् भूयस्यः स्युर्हि सिद्धयः ।

ब्रह्मताराभ्यासकथनम्

ब्रह्मताराभ्यासयोगान्नादयोगः प्रजायते ॥ ३५ ॥

तत् तत् नाडीयों के योग से बहुत सिद्धियाँ प्राप्त हो जाती हैं । ब्रह्मतारा के अभ्यास योग से 'नाद योग' उत्पन्न होता है ॥ ३५ ॥

नादो ध्वनिरिति प्रोक्तः सप्तधा स हिकीर्तितः ।
तदेव निर्गुणं ब्रह्म ध्येयं परगुणोत्तरम्॥ ३६ ॥

नाद ध्वनि को कहते हैं जो सात प्रकार का कहा गया है, वही निर्गुण ब्रह्म हैं और गुणों से श्रेष्ठ होने के कारण वही ध्येय भी हैं ॥ ३६ ॥

यथाकारस्तु वीणायां पृष्ठवंशे तथा भवेत् ।
सगुणा ध्यानयोगात्तु यथा निर्गुणतां व्रजेत् ॥ ३७ ॥

जिस प्रकार वीणा के वजा लेने पर उसके पीछे साकार शब्द, फिर निर्गुण ध्वनि होती है । उसी प्रकार सगुणा ध्वनि के ध्यान योग के बाद वही ध्वनि निर्गुणा हो जाती है ॥ ३७ ॥

नादोत्पत्तिकथनम्

यथा वीणाभ्यासयोगान्नादयोगः प्रजायते ।
तथा ताराजापयोगाद् देहे नादः प्रवर्तते ॥ ३८ ॥

जिस प्रकार वीणाभ्यास के योग से नाद योग उत्पन्न होता है उसी प्रकार तारा के जाप योग से शरीर में नाद उत्पन्न होता है ॥ ३८ ॥

देहनादे जायमाने सिद्धभूमिः प्रकीर्तिता ।
सिद्धभूमिर्महेशानि मेधादीक्षाप्रगोचरा ॥ ३९ ॥

देह में नाद की उत्पत्ति होने पर शरीर ही सिद्धि की भूमि होता है । हे महेशानि ! वह सिद्धिभूमि 'मेधादीक्षा' द्वारा दिखाई पड़ती है ॥ ३९ ॥

विद्याभ्यासान्महेशानि जीवः कीटो भवेद् ध्रुवम् ।
कीटो भ्रमरतां प्राप्य यथा विशति निर्गुणे ॥ ४० ॥

हे महेशानि ! तारा विद्या के अभ्यास से जीव निश्चित रूप से (भृङ्गकीटन्यायवशात्) कीट बन जाता है, फिर वही कीट भ्रमरता को प्राप्त कर निर्गुण (ब्रह्म) में प्रवेश कर लेता है ॥ ४० ॥

परकायप्रवेशकथनम्

आश्चर्यं तु महेशानि जीवो जीवप्रवेशकः ।
परकायप्रवेशो हि सैव प्रोक्तो महेश्वरि ॥ ४१ ॥

हे महेशानि ! आश्चर्य है कि जीव ही जीव को प्रविष्ट कराने हेतु प्रवेश करता है, हे महेश्वरि ! उसी को 'परकाय प्रवेश' कहा जाता है ॥ ४१ ॥

मेधादीक्षां समासाद्य साम्राज्यदीक्षयाऽन्वितः ।
साधको भवति प्राज्ञे नान्यथा शाङ्करं वचः ॥ ४२ ॥

साधक 'मेधादीक्षा' प्राप्त कर 'साम्राज्य दीक्षा' से युक्त हो जाता है । यह शङ्कर का वचन प्राज्ञों के लिये है जो झूठ नहीं है ॥ ४२ ॥

सर्वसाम्राज्यमेधाभिः संयुक्तो यस्तु मानवः ।
दिव्यसाम्राज्यदीक्षायामधिकारी भवेद् ध्रुवम् ॥ ४३ ॥

जो मनुष्य 'सर्वसाम्राज्य मेधा' से संयुक्त होता है उसका निश्चय ही 'दिव्य साम्राज्य दीक्षा' में अधिकार हो जाता है ॥ ४३ ॥

दिव्यसाम्राज्यदीक्षा तु ताराविद्याप्रगोचरा ।
ऊर्ध्वाम्नायेश्वरी देवि महोग्रा तारिणी स्मृता ॥ ४४ ॥

दिव्य साम्राज्य दीक्षा तो तारा विद्या से प्राप्त होती है । हे देवि ! ऊर्ध्वाम्नाय की ईश्वरी 'महोग्रातारिणी' कही गई है ॥ ४४ ॥

ब्रह्मविद्यास्वरूपकथनम्

ब्रह्मविद्या तु सम्प्रोक्ता वेदोपास्या निरन्तरम् ।

तदाम्नायं प्रवक्ष्यामि येन तन्मयतां व्रजेत्॥ ४५ ॥

जो वेदों में नित्य उपासनीय रूप से कही गई हैं वही 'ब्रह्म विद्या' कही जाती हैं । अब मैं उस आम्नाय को कहता हूँ जिससे साधक तत्स्वरूप को प्राप्त हो जाता है ॥ ४५ ॥

१. पूर्वाम्नाये सृष्टिरूपमन्त्रयोगकथनम्

आदौ तु स्पर्शताराऽत्र चन्द्रवर्णा प्रकीर्तिता ।
चन्द्रघण्टा घण्टिका च द्वात्रिंशद्वर्णगोचरा ॥ ४६ ॥

पूर्वाम्नाय में सृष्टिरूप मन्त्रयोग का निरूपण—इसमें सर्वप्रथम स्पर्शतारा हैं, फिर चन्द्रवर्णा, चन्द्रघण्टा और घण्टिका इसके बाद द्वात्रिंशद् वर्ण गोचरा मातृका हैं ॥ ४६ ॥

